वर्षम्-१

अङ्कः-३

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११० वैक्रमाब्दः २०६५ पौषशुक्ल ५ – चैत्रशुक्ल ५ शकः १९३० जनवरी – मार्च २००९



नवदेहल्यां साहित्य-अकादम्यां माननीयस्य मा.सं.वि.मन्त्रिणः अर्जुनसिंहस्य मुख्यातिथित्वे प्रवृत्ते काव्यसङ्ग्रह-लोकार्पणकार्यक्रमे समुपस्थितः संस्थानकुलपतिः राधावल्लभत्रिपाठी



डा. करणसिंहस्य कृते संस्कृतवार्तायाः द्वितीयमङ्कं प्रयच्छन् कुलपतिः राधावल्लभत्रिपाठी



दूरस्थशिक्षाकार्यशालासदस्यान् उद्बोधयितुं समुपस्थितां सरोजिनीमहिषीमहोदयां स्वागतीकुर्वन् कुलपतिः राधावल्लभत्रिपाठी, दूरस्थशिक्षणविशेषज्ञः सी.आर्.के.मूर्तिः च

## सम्पादकीयम्

संस्कृतवार्तायाः तृतीयोऽयमङ्कः शैक्षणिकसत्रावसाने नूतनसंवत्सरसमारम्भावसरे च प्रकाश्यते। संस्थानस्य दशसु परिसरेषु विगतेषु त्रिषु मासेषु नानाकार्यक्रमाः–वार्षिकोत्सवाः, सङ्गोष्ठ्यो वा समायोजिताः। तेषां विवरणमिह प्रस्तूयते।

संस्थानस्य निर्माणाधीनपरिसरभवनेषु भोपालपरिसरभवनानां निर्माणस्य प्रथमचरणं षट्सु मासेषु पूर्णं भविष्यति। अथ च मुम्बई-गरली-परिसरयोः भवनानामपि निर्माणमस्मिन् नूतनसंवत्सरारम्भे प्रारभ्येत।

संस्कृतविद्याया अभिनव उन्मेष एकविंशतितमे शतके सञ्जायते। तत्र काश्चन नवीनाः प्रवृत्तयः परिलक्ष्यन्ते। तासु संस्कृतशास्त्राणां परिशीलनाय पुनर्व्यवस्थापनाय पुनर्मीमांसायै च साम्प्रतिक्याः प्रौद्योगिक्याः सदुपयोगः इति वर्तते एका नवीना दिक्। राष्ट्रियसंस्कृतसंस्थानेन अस्यां दिशि पञ्चसु वर्षेषु शतं प्रायः संस्कृतसाहित्यभाण्डागारस्य गौरवग्रन्था विश्वजालपुटे (website) निवेक्ष्यन्ते, पञ्चाशत्प्रायाणां च ई-पाठः सी.डी. द्वारेण उपलब्धो विधास्यते।

सम्प्रति नूतनसंवत्सरे समेधमानायां संस्कृतश्रियि संस्कृतवार्तापाठकेभ्यः श्लोकद्वयेन मङ्गलकामनाः वितीर्यन्ते–

**आशाः सञ्जनयन् जनस्य हृदयेष्वाशासु चाशासु वै**
**विश्वासं जनतन्त्ररीतिषु दृढं पुष्णंश्च पूषा यथा।**
**क्षेत्रेषु प्रथयंश्च शस्यनिचयैः स्वर्णप्रभामुज्ज्वलां**
**भूयाद् भारतभूतये भयहरः संवत्सरो नूतनः॥**

**आतङ्कं क्षपयन् कलिं कवलयन् दारिद्र्यमुन्मूलयन्**
**भित्तीर्भेदकरीर्भ्रमाश्रयतताः सम्पातयन् सर्वथा।**
**पाखण्डं खलु खण्डखण्डमभितः कुर्वन् प्रहारैः खरै-**
**र्भूयात् संस्कृतिमङ्गलस्य सदनः संवत्सरो नूतनः॥**

*–राधावल्लभः त्रिपाठी*



अ.भा.सं.नाट्योत्सवे उद्घाटनावसरे दीपं प्रज्वालयन् कावालं पणिक्करः अन्ये च



राधामाधव-सं.म.वि. छात्रैः प्रस्तुतस्य गीतगोविन्दस्य एकं दृश्यम्

**मुख्यपरामर्शदाता**

प्रो. राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

डॉ. हिन्दकेसरी, जयपुरम्

डॉ. एन्. आर्. कण्णन्, लखनऊ

डॉ. जि. गङ्गन्ना, पुरी

डॉ. कमलचन्दयोगी, मुम्बई

प्रो. रामानुजदेवनाथः,शृङ्गेरी

प्रो. विश्वमूर्तिशास्त्री, जम्मू

प्रो. सुरेन्द्रझाः, इलाहाबादम्

प्रो. के.टी. माधवन्, गुरुवायूरु

प्रो. आजादमिश्रः, भोपालम्

डॉ. प्रकाशपाण्डेयः, गरली

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी

डॉ. रत्नमोहनः झा

कु. वेङ्कटेशमूर्तिः

**सहयोगिनौ**

प्रफुल्लगडपालः

त. महेन्द्रः



प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,

नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in

## प्रतिवार्ता




सम्मान्यकुलपतिमहोदयानां प्रेरणया राष्ट्रियसंस्कृतसंस्थानेन प्रथमतया प्रकाशितस्य 'संस्कृतवार्ता'-पत्रस्य आद्याङ्कदर्शनावसरो लब्धः। रुचिरा चेतोहरा प्रस्तुतिर्विद्यते। तदर्थं निश्चप्रचमेव समेषां संस्कृतानुरागिणां धन्यवादार्हाः कुलपतयः। जातौ समूहे वा एकवचनस्यापि प्रयोगात् 'संस्कृतवार्ता'-भिधानं साधु वर्तते, तथापि अस्माकम् आकाशवाणीदूरदर्शनयोः परम्परानुसारिणः 'संस्कृतवार्ताः'- पदस्य प्रयोगे का विप्रतिपत्तिः?

–चन्द्रभूषणझाः (नवदेहली)

यदि प्रयोगद्वयमपि साधु वर्तते तर्हि अन्यतरसाधुप्रयोगे न खलु भवेत् विप्रतिपत्तिः?

–सम्पादकः

**शुद्धिसूचना**

संस्कृतवार्तायाः द्वितीये अङ्के पञ्चदशे पृष्ठे वामतः उपरिष्टात् २१ तमायां पङ्क्तौ 'जितेन्द्रकुमारः' इत्येतत् नाम प्रकटितम् आसीत्। किन्तु तस्मिन् स्थाने उमा इति नाम भवेत् इति परीक्षाविभागेन परिष्कृता सूचना दत्ता। क्षमां दत्त्वा वाचकाः परिष्कृत्य पठेयुरिति निवेदनम्।

-सम्पादकः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

### मधुरस्मृतयः

नवत्यधिकैकोनविंशतिशततमे ख्रीष्टीयाब्देऽहं प्रयागनगरे स्थिते श्रीगङ्गानाथझा-केन्द्रीय-संस्कृत-शोधसंस्थाने शोधच्छात्ररूपेण प्राविशम्। यदाऽहं परिसरे प्रविष्टो जातः संस्कृत-संस्थानस्य परिसरस्य यादृक् समीचीनं स्थलं वातावरणं वा भवितव्यं मनोनुकूलं मे तथैवोपयुक्तं दृष्टम्। तच्च नवत्यधिकैकोनविंशतिशततमस्य च्छटाः हृत्पटले अङ्किताः। हरितवृक्षैस्तृणैश्चाच्छादितमत्रत्यं प्राकृतिकं दृश्यं नितरां मनोहरं विद्यते। एतादृशं सुरम्यं वातावरणं प्रयागनगरेऽप्यन्यत्र नोपलभ्यते। अस्मिन् परिसरे प्रवेशकाले प्रतीयते यत् कण्वमुनेराश्रमं प्रविशामि इति। प्रमुखद्वारि प्रवहन्तो निर्झरो वर्तुलाकृतौ सरसि विकसितानि जलजानि केषाञ्चिदपि मनांसि बलादाकर्षयन्ति। संस्थानस्यान्तः निर्मितो पुस्तकालयो संग्रहालयश्च वर्तेते। तेषां संरक्षणमादान-प्रदानयोः प्रक्रिया चातीव सरला श्लाघ्याऽऽकर्षणीया च। अस्माकं गुरुवर्यः डा. गोपराजू रामा अनेकासां भाषाणां वेत्ता चाऽऽसीत्। अत्र साहित्यप्रवाचकपदेऽधिष्ठिता डा. शैलकुमारी मिश्रा नवदुर्गासु प्रथमा शैलपुत्रीव कारुण्यमयी जननी सदृशी परिलक्ष्यते। डा. किशोरनाथझा तथा चान्ये गुरुवर्याः शोधकर्तारश्च सर्वे कियन्तो मधुरभाषिण आसन् इत्यवर्णनीयमेव। भवनस्यापराट्टालिकायां विरचिता सुसज्जिता रङ्गशाला जनानां मनांसि मोहयति। कियती शोभना रङ्गशाला? इयं रङ्गशाला वस्तुत अवर्णनीयैव। सर्वे शोधच्छात्राः छात्र्यश्चापि यदा देवभाषायां कमप्यभिनयं मञ्चयन्ति स्म तदा परस्परं तदीयकथोपकथनमाकर्ण्य एतत् प्रतीयते स्म यत् वयं देवलोके वसामः। यतो हि संस्कृतवाणी 'देववाणी' इति निगद्यते। प्राचार्यपदे मधुरभाषाभाषिणः विद्याविनयसम्पन्नाः डॉ. गयाचरणत्रिपाठिमहाभागाः तदानीं विराजन्ते स्म। ते वस्तुतः अपरः धर्मराज इव प्रतीयन्ते स्म। परिसरस्यानुचराः अपि समधिकमनुशासिताः आसन्।

डा. राजाराममिश्रः

प्राचार्यः, महाविद्यालयः सरायप्रानमती

पो. भगवतगञ्ज् वि.क्षे. मानधाता

जनपद-प्रतापगढ (उ. प्र.)

## देहल्यां संस्थानपरिसरविकासाय प्रयासः प्रवर्तते

देहल्यां संस्थानपरिसरस्य निमित्तं विशालभूखण्डं प्राप्तुं क्रियमाणः प्रयासः अग्रपथे वर्तते। देहल्याः नजफगढग्रामे भूखण्डप्राप्तेः सम्भावनां धरन्ति कुलपतिप्रमुखाः संस्थानाधिकारिणः। एतदन्तरे नजफगढग्रामवासिनां परतया तत्रत्यः विधानसभा-विधायकः श्रीमान् भरतसिंहः, संस्थानपरिसरः तत्र भवेदिति निवेदनं संस्थाने समर्पितवान् आसीत्। तदर्थमपेक्षितं विस्तृतभूखण्डं प्रापयितुं यथाशक्ति सहयोगः अपि करिष्यते इति सः प्रतिश्रुतवान् अस्ति।

## अभिराजराजेन्द्रमिश्रः अतिथ्याचार्यत्वेन नियोजितः

सुविश्रुतो महाकविः पण्डितः संस्कृतसाहित्यस्य तासु तासु विद्यासु रचनाकर्मणा अधीत्या बोधेन च पारङ्गतः 'अभिराज'-राजेन्द्रमिश्रः राष्ट्रियसंस्कृतसंस्थानस्य प्रयागस्थे श्री गङ्गानाथझा-परिसरे अतिथ्याचार्यो नियोजितः। स चायं स्वनामधन्यः परिसरेऽस्मिन् नवसंवत्सरारम्भे कार्यभारं ग्रहीष्यति। आधुनिकसंस्कृतसाहित्यमधिकृत्य शोधयोजनायाः प्रवर्तनेन संस्थानस्य विविधप्रकाशनेषु चास्य अवदानेन कश्चन प्रकर्षोऽवश्यं भवितेति सम्भावयन्ती संस्कृतवार्ता सुरभारती-समाराधकं साहित्यकारं स्वागतीकरोति।

## मार्चमासान्ते मुख्यालयकार्यक्रमाः

- २६-३-०९ 'कविभास्करी' अखिलभारतीयसंस्कृत-कविसमवायः देशस्य विभिन्नभागेभ्यः समाहूताः त्रिंशदधिकाः प्रसिद्धाः कवयः अत्र भागं ग्रहीष्यन्ति।
- ३१-३-०९ सङ्गणके संस्कृतग्रन्थानां विन्यासमधिकृत्य द्वितीया कार्यशाला।
- तस्मिन्नेव दिने न्यूयार्क-विश्वविद्यालयस्य संस्कृत-प्राध्यापकस्य शेल्डान् पोलोक्महोदयस्य 'पाश्चात्त्यदेशेषु संस्कृतानुशीलनम्' इति विषयमधिकृत्य व्याख्यानम्।

## संस्थानस्य विश्वव्यापिजालपुटे (website) नाट्यशास्त्रम्

संस्थानेन अनतिपूर्वमेव स्वीय-विश्वव्यापिजालपुटे (website) अधोनिर्दिष्टाः ग्रन्थाः निवेशिताः-

- भरतमुनिविरचितं नाट्यशास्त्रम्
  (अभिनवगुप्तविरचितया अभिनवभारतीव्याख्यया सहितम्)
  सम्पादकौ - आचार्यः राधावल्लभत्रिपाठी, डा. शिल्पी मिश्रा
- मम्मटस्य काव्यप्रकाशः
  प्रस्तोत्री - डा. शिल्पी मिश्रा
- Indian Asthetics Revisited
  लेखकः - आचार्यः राधावल्लभःत्रिपाठी

## अर्थसमितेः प्रबन्धमण्डलस्य च उपवेशनं सम्पन्नम्।

रा.सं.संस्थानस्य अर्थसमितेः द्वादशम् उपवेशनम्, प्रबन्धमण्डलस्य नवदशं च उपवेशनं संस्थानमुख्यालये १७-०२-०९ तमे दिनाङ्के सम्पन्नम्। तत्र निर्णीतविषयेषु विशिष्टतया उल्लेखनीया अंशाः इमे-

- संस्थानपरिसरेषु वेदागम/तन्त्र/शैवदर्शन/नाट्यशास्त्र/ भारोपीय-भाषाविज्ञान-विभागाः आरप्स्यन्ते।
- संस्थानस्य इलाहाबादस्थगङ्गानाथझापरिसरे अतिथ्याचार्यत्वेन विख्यातस्य संस्कृतकविवरस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य भूतपूर्वकुलपतेः आचार्यस्य अभिराजराजेन्द्रमिश्रस्य नियोजनम् अनुमोदितम्।

## कुलपतिना अफगानि-विद्वान् सम्मानितः

०१.०१.२००९ दिनाङ्के संस्थानमुख्यालये सम्पन्ने विद्वत्सपर्या-कार्यक्रमे रा.सं.संस्थानकुलपतिना राधावल्लभत्रिपाठिमहोदयेन अफगानिस्तानस्य काबुल्विश्वविद्यालयस्य 'पश्तो' भाषाविभागाध्यक्षः प्रो. ए.के. रशीद्महोदयः सम्मानितः। कार्यक्रमे आदौ, डा. मुहम्मद-हनीफखान्, रशीद्वर्यस्य संस्कृताभिमानित्वं विवृतवान्। रशीद्वर्यः स्वीयभाषणे उच्चारणपुरस्सरं पश्तोभाषायाः बहूनि पदानि संस्कृतशब्द-सादृश्यं भजन्ते इति निरूपितवान्। सः संस्कृत-पश्तो-भाषयोः विषये कामपि विशिष्टां परियोजनाम् आरब्धुम् उत्साहं प्रादर्शयत्। अन्ते भाषमाणः कुलपतिमहोदयः काबुल्विश्वविद्यालये संस्कृताध्ययनस्य विशिष्ट-व्यवस्थायाः आरम्भयोजनाम् उद्दिश्य संस्थानपक्षतः शुभकामनां व्याहरत्। अस्मत्पूर्वजैः विश्वं भवत्येकनीडमिति भावनया प्रातिवेशिकदेशैः सह संस्थापितम् उत्तमं सम्बन्धमपि सोदाहरणं व्यवृणोत्।

## श्रीजगन्नाथपञ्चाङ्गस्य लोकार्पणम् अभूत्

राष्ट्रियसंस्कृतसंस्थानस्य गरलीपरिसरे ज्योतिषविभागे उपाचार्यत्वेन कार्यरतः डा. मदनमोहनपाठकः विगतेभ्यः नवभ्यः वर्षेभ्यः प्रतिवर्षं पञ्चाङ्गस्य निर्माणं प्रकाशनं च करोति। अखिलभारतोपयोगिनिरयणं चित्रापक्षीयं दृक्सिद्धञ्च श्री जगन्नाथनाम्ना विश्रुतं पञ्चाङ्गमिदम् अपेक्षितविवरणसमन्वितं वर्तते। ऐषमः २०६६ विक्रमाब्दस्य नवीनं पञ्चाङ्गं पुर्यां श्रीजगन्नाथधाम्नि संस्थानेनायोजितस्य अखिलभारत-शास्त्रीय-संस्कृतभाषणस्पर्धा-कार्यक्रमस्य उद्घाटनावसरे संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिवर्येण लोकायार्पितम्।

**सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।**
**सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।।**
विक्रमोर्वशीयम्, ५.३९

## पाठसंरचनाकार्यम् आरब्धम्

दूरस्थशिक्षामाध्यमेन अध्ययनाय सामग्रीनिर्माणकार्यस्य द्वितीयघट्टः समारब्धः। विदितमेव समेषां यत् गतवर्षे नवदेहल्यां पुर्यां च आयोजितकार्यशालायां प्राक्शास्त्रि-शास्त्रि-आचार्यकक्षाणां प्रथमवर्षस्य व्याकरण-साहित्य-ज्यौतिषविषयेषु पाठसंरचना-निर्धारणपुरस्सरं अध्ययनसामग्रीलेखनं प्रारब्धमासीत् इति। सम्प्रति तेषु एव विषयेषु द्वितीय/तृतीयवर्षयोः पाठ्यक्रमस्य स्वाध्यायसामग्र्याः निर्माणाय संस्थानेन उपक्रमः कृतः। तदङ्गतया आदौ व्याकरणविषये पाठसंरचनाकल्पनाय फरवरी-मासस्य १४ तः २० दिनाङ्क-पर्यन्तं नवदेहल्यां समायोजिता इयं कार्यशाला संस्थानपार्श्ववर्तिनि राष्ट्रिय-सामाजिक-सुरक्षा-अनुसन्धान-परिषद्भवने सम्पन्ना। विभिन्नराज्येभ्यः समाहूताः २५ विद्वांसः अस्यां कार्यशालायां भागमगृह्णन्। सप्तदिनात्मक-कार्यशालायाम् आदौ दिनत्रयं यावत् लघुप्रशिक्षणकार्यक्रमः प्रवृत्तः। तत्र सरलशैल्या, दूरस्थशिक्षापरिषदः मर्यादानुसारेण स्वाध्यायानुकूलशैल्या च अध्ययनसामग्र्याः रूपकल्पनं लेखनं च कथं स्यादिति विषये प्रशिक्षणं दातुं इ. गा. रा. मु. वि. विद्यालयतः दूरस्थशिक्षणविशेषज्ञः आचार्यः सी.आर्.के. मूर्तिः समाहूत आसीत्। प्रशिक्षणकार्यक्रमम् उद्घाटयन् सः अवदत् यत् अद्यतनकाले जगतः कोणे कोणे विद्यमानानां जिज्ञासूनां विद्याध्ययनापेक्षां पूरयितुं, यावज्जीवम् अध्ययनशीलतां (life long learning) प्रोत्साहयितुं, सीमितसाधनैः अधिकाधिकजनानां शिक्षणव्यवस्थां कल्पयितुं च दूरस्थशिक्षणम् एकः प्रभावशाली माध्यमः अस्ति इति। प्रास्ताविकभाषणं कुर्वाणः संस्थानस्य दूरस्थशिक्षायाः संयोजकः डा. रत्नमोहनः कार्यशालायाः उद्देश्यं स्पष्टीकृत्य साहित्यज्यौतिषविषययोः कार्यशाला अचिरादेव आयोजयिष्यते इति सूचितवान्।

उद्घाटनसत्रानन्तरं दिनत्रयं यावत् प्रशिक्षणं, तत्पश्चात् २०दिनाङ्कं यावत् पाठसंरचना (खण्ड-पाठ-पाठबिन्दूपबिन्दूनां रूपकल्पना) विद्वद्भिः गणशः सुविचार्य कृता। एतन्मध्ये १७तमे दिनाङ्के कार्यशालायाम् उपस्थिताः सर्वे संस्थानमुख्यालयम् आगत्य कुलपतेः आचार्यराधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये सरोजिनीमहिषी- महोदयायाः, आचार्यगौतमभाईपटेलमहोदयस्य च उपस्थितौ प्रवृत्ते परिचयसंवादकार्यक्रमे भागमगृह्णन्। तत्र सभां सम्बोध्य भाषमाणा संस्थानस्य उपाध्यक्षचरा श्रीमती सरोजिनीमहिषी संस्कृतान्तर्गतं समाजोपयोगिज्ञाननिधिं विद्वांसः सम्भूय समुद्धृत्य यथायोग्यं प्रकाशयेयुः इत्यभिप्रायं प्राकाशयत्। तदनन्तरं भाषणं कुर्वन् कुलपतिः दूरस्थशिक्षामाध्यमेन संस्कृतशिक्षणक्षेत्रे अभूतपूर्वविकासम् आनेतुं संस्थानेन आरब्धं प्रयासं विवृतवान्। २०-२-०९ तमे दिनाङ्के कुलपतिवर्यस्य आध्यक्ष्ये, सामाजिकसुरक्षा-अनुसन्धानपरिषदः निदेशकस्य उपस्थितौ अस्याः कार्यशालायाः सम्पन्नतासत्रम् आयोजितम्।



दूरस्थशिक्षाकार्यशालायाः उद्घाटनावसरे सरस्वतीवन्दनं कुर्वन् सी.आर.के. मूर्तिमहोदयः

## 'संस्कृतं सङ्गणकं च' इति विषये कार्यशाला सम्पन्ना

जनवरीमासस्य ३१ तमे दिनाङ्के संस्थानमुख्यालये संस्कृत-सङ्गणक-सम्बद्धेषु विविधविषयेषु परिचिन्तनाय एकदिवसीया कार्यशाला समायोजिता। संस्थानकुलपतेः आचार्य राधावल्लभ-त्रिपाठिवर्यस्य आध्यक्ष्ये प्रवृत्तायाम् अस्यां कार्यशालायां हैदराबादस्थ-भारतीय-सूचनाप्रौद्योगिकसंस्थायाः निदेशकः आचार्यः राजीवसङ्गल, तत्रत्य एव अन्यः सङ्गणकज्ञः आचार्यः नवज्योतिसिंहः, जयपुरस्थ-ज.रा.संस्कृतविश्वविद्यालयस्य भूतपूर्वः कुलपतिः रामकृष्णमाचार्यः, मध्यप्रदेशस्थित-सागरविश्वविद्यालयस्य आचार्यः अच्युतानन्ददाशश्च विशेषतया समाहूताः आसन्। कार्यक्रमे पूर्वाह्णसत्रे भाषमाणः राजीवसङ्गलमहोदयो न्यगादीत् यत् संस्कृतशास्त्रपरम्पराणां प्रविधानतः सङ्गणकक्षेत्रे तथाविधं किमपि नवीनमाविष्कर्तुं शक्यते येन सङ्गणकं मानवभाषया संवादं कुर्यात्। सङ्गणके नाट्यशास्त्रादिग्रन्थानां विनिवेशेन नवीना संस्कृतिः विश्वस्मिन्नपि विश्वे विकासं प्राप्नुयात् इति। भारतीयसूचना-प्रौद्योगिकीसंस्थाने संस्कृतव्याकरणसाहाय्येन अनुवादसहकारि-सूक्ष्मसाधननिर्माणकार्यं प्रगतिपथे वर्तत इति तेन ज्ञापितम्। उद्घाटनवक्तव्ये कुलपतिः अकथयत् यत् ''संस्कृतशास्त्राणां तत्सम्बद्धपरम्पराणां च नवीनसञ्चारसाधनैः प्रस्तुतीकरणं परमावश्यकम्। अस्मिन् विषये नैकत्र बहुविधानि कार्याणि प्रवर्तन्ते। तादृशकार्यकर्तॄणां परस्परं संवादः साधनीयः। इलेक्ट्रोनिक्-माध्यमेन संस्कृतवाङ्मयान्तर्गतविषयाणां नवीनविन्यासः करणीयः'' इति। आचार्यो नवज्योतिसिंहः अभिप्रेतवान् यत् 'विश्वसम्मुखं भारतीयमनीषायाः आविष्कारे यः गतिरोधः विद्यते सः अपाकरणीयः। पाण्डुलिपीनां प्रकाशितग्रन्थानामपि उपलब्धिः यथा स्यात् तथा कर्तुं सङ्गणकादिमाध्यमस्य सदुपयोगः कार्यः। ज्ञानोपलब्धिनिमित्तम् अपेक्षितकोशनिर्माणं भवेत्। शास्त्रपरम्परायाः आधुनिकव्यवहारे समन्वयावहं रूपम् आविष्क्रियेत' इति। संस्कृत-सङ्गणकयोः क्षेत्रे कृतभूरिपरिश्रमः जयपुरस्थ-ज.रा.रा.सं. विश्वविद्यालयस्य भूतपूर्वकुलपतिः के.वी. रामकृष्णमाचार्यः स्वाभिप्रायं प्रकाशयन् अवदत् यत् अस्मिन् क्षेत्रे स्वामित्वभावनया कार्यं न भवेत्। एतादृशविषयेषु बद्धादराणां सहृदयानां कार्यकर्तॄणां महान् गणः एकः भवेत् इति। सः सङ्गणकमाध्यमेन सज्जीकृतां गवेषिकामेकां प्रादर्शयत्। 'राष्ट्रियडेटाबैङ्क्' इत्यस्य महतः कोशविशेषस्य आवश्यकतां च प्रत्यपादयत्।

## कुलपतेः दैनन्दिनी

०१-०१-०९ संस्थानमुख्यालये अफगानीविदुषः ए.के. रशीद् इत्यस्य सम्माननम्।

१०-०१-०९ जयपुरपरिसरे राष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमे आध्यक्ष्यम्।

१७-१-०९ मुम्बय्यां संस्थानपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्।

२६, २७-१-०९ तिरुपतौ रा.सं.विश्वविद्यालये विद्वत्परिषदि, कार्यपरिषदि, दीक्षान्तसमारोहे च भागग्रहणम्।

७-२-०९ देहल्यां भोगीलाललेहरचन्दप्राकृतजैनविद्याशोधसंस्थानेन जैन-जीवनपद्धतिः इति विषये आयोजितायाः राष्ट्रियसङ्गोष्ठ्याः समापनकार्यक्रमे मुख्यातिथित्वेन भाषणम्।

२, ३-०२-०९ संस्थानेन कोलकातायां भारतीयभाषापरिषदः, श्रीसीतारामवैदिक-आदर्शसंस्कृतमहाविद्यालयस्य च सहयोगेन आयोजितायां पण्डितगौरीनाथशास्त्रिस्मृतिव्याख्यानमालायाः प्रथमगोष्ठ्याम् (विश्वसाहित्यपरिप्रेक्ष्ये भारतीयं सौन्दर्यशास्त्रम् इति विषयिण्यां) आध्यक्ष्यम्।

१०-२-०९ देहल्यां हिन्दी-अकादम्या आयोजिते निराला-पर्वणि 'भारतीय काव्य परम्परा एवं निराला' इति विषये भाषणम्।

१४-२-०९ जम्मूस्थरणवीरपरिसरवार्षिकोत्सवे मुख्यातिथित्वेन उद्बोधनम्।

१७-२-०९ संस्थानमुख्यालये अर्थसमितेः प्रबन्धमण्डलस्य च उपवेशने अध्यक्षता।

१८-२-०९ अनुदाननिर्णयसमितेः (GIAC) समावेशे उपस्थितिः।

२१-२-०९ गरलीपरिसरस्य वार्षिकोत्सवे मुख्यातिथित्वम्।

२५-२-०९ जयपुरपरिसरस्य वार्षिकोत्सवे आध्यक्ष्यम्।

२६,२७-२-०९ केरले त्रिपुनित्तुरम् इत्यत्र श्रीरामवर्मशासकीयसंस्कृतमहाविद्यालयस्य निरीक्षणावसरे राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषद्दलस्य नेतृत्वम्।



बेङ्गलूरुस्थ-पूर्णप्रज्ञसंशोधनमन्दिरसन्दर्शनावसरे तत्रत्य प्रकाशनं परिशीलयन् राधावल्लभत्रिपाठी चित्रे वामतः प्रह्लादाचार्यः नागसम्पिगे च

०२-३-०९ नवदेहल्यां श्री ला.ब.शा.रा.सं. विद्यापीठे 'संस्कृते अनुसन्धानस्य नवीना आयामाः, अनुवादसन्दर्भे समस्याश्च' इति विषये व्याख्यानम्।

०३-०३-०९ सागरस्थ - डा.ह.सिं.गौ. विश्वविद्यालये राष्ट्रियसङ्गोष्ठ्यां अतिथित्वेन उद्बोधनम्।

०४-०३-०९ जयपुरे जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालये भाषणम्।

०५-३-०९ संस्थानमुख्यालये अध्ययन/पाठ्यक्रमपरिषदः उपवेशने मार्गदर्शनम्।

०७-३-०९ भारतीयभाषापरिषदा कोलकातायाम् आयोजितायां राष्ट्रियगोष्ठ्यां सारस्वतातिथित्वम्।




भोपाले मध्यप्रदेश-प्रशासन-अकादमी इत्यत्र प्रवृत्तायां संगोष्ठ्यां भाषमाणः कुलपतिः राधावल्लभत्रिपाठी

१०-३-०९ बेङ्गलूरुनगरे पूर्णप्रज्ञसंशोधनमन्दिरेण 'अभिनवकाव्यालङ्कारसूत्राणि' इति विषये आयोजितगोष्ठ्याः समुद्घाटनभाषणम्।

१२-३-०९ संस्थानस्य मुख्यालये विद्वत्परिषदः उपवेशने आध्यक्ष्यम्।

१६-३-०९ मुख्यालये छात्रवृत्तिसमितिसमावेशे अध्यक्षता।

१८-३-०९ पुण्यपत्तने भण्डारकर-प्राच्यविद्या-शोधसंस्थया (BORI) आयोजितायाः वाक्यार्थसभायाः उद्घाटनभाषणम्।

२० तः २२-३-०९ भोपाले भारतभवने रा.सं.संस्थानेन आयोजिते अखिलभारत-संस्कृतनाट्योत्सवे आध्यक्ष्यम्।

२३-३-०९ भोपालपरिसरेण प्रशासन-अकादम्याम् आयोजिते 'संस्कृतवाङ्मये प्रबन्धविज्ञानम्' इति विषये सङ्गोष्ठ्याम् अध्यक्षभाषणम्। भोपालनागरिक-अभिनन्दनसमित्या संस्कृतसाहित्यसेवामुपलक्ष्य सम्मानितः।

२६-३-०९ NATRSS इत्यत्र संस्थानेनायोजिते 'कविभास्करी' अखिलभारतीयसंस्कृतकविसमवाये आध्यक्ष्यम्।

# अखिलभारतशास्त्रीयसंस्कृतभाषणस्पर्धा शलाकापरीक्षाश्च सम्पन्नाः

दिसम्बरमासस्य २३ तः २५ दिनाङ्कपर्यन्तं पुर्यां सदाशिवपरिसरे संस्थानेन ऐषमः अखिलभारतशास्त्रीयसंस्कृतभाषणस्पर्धाः शलाकापरीक्षाः च आयोजिताः आसन्। एतासु स्पर्धासु भागग्रहणाय विभिन्नराज्येभ्यः एकैकः स्पर्धार्थिगणः समायात आसीत्। आहत्य उपद्विशतस्य प्रतिभासम्पन्नानां वर्धिष्णूनाम् उत्साहिनां भागग्रहणेन कार्यक्रमः सफलतामगात्। विविधशास्त्रीयस्पर्धासु प्रतिभागिनां प्रतिभाप्रदर्शनं पाटवं च अवलोक्य पुरीनगरवासिनः प्रेक्षकाश्च आनन्दिता अभवन्।

२३ दिनाङ्के पुरीस्थ-पौरसदने प्रवृत्ते उद्घाटनावसरे तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य भूतपूर्वकुलपतिः आचार्यः प्रह्लादाचार्यः सारस्वतातिथिरूपेण, तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य इदानीन्तनकुलपतिः आचार्यः हरेकृष्णशतपथिमहोदयः विशिष्टातिथिरूपेण, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचरः राजेन्द्रमिश्रः सम्मानितातिथिरूपेण, संस्थानकुलपतिः आचार्यराधावल्लभत्रिपाठिवर्यः अध्यक्षरूपेण च समुपस्थिताः आसन्। सदाशिवपरिसरप्राचार्यः डा. जि. गङ्गन्ना अतिथिवर्यान् पुष्पगुच्छेन स्वागतीकृतवान्। हरेकृष्णशतपथिमहोदयस्य अभिप्रेरणात्मकेन भाषणेन सर्वे समुत्साहिता अभवन्। प्रह्लादाचार्यवर्यः शास्त्रसंरक्षणदृष्ट्या प्रतिभाप्रोत्साहनदृष्ट्या च ईदृशकार्यक्रमाणामा-योजनम् आवश्यकम् इति अभिप्रायं प्राकाशयत्। समवेतान् विदुषः सम्बोध्य स्वीयं वक्तव्यं प्रस्तुवन् आचार्यः अभिराजराजेन्द्रमिश्रमहोदयः अवदत् यत् संस्थानं कुलपतेः सानाथ्ये उत्तरोत्तरं प्रकर्षावस्थां प्राप्नुवदस्तीति। अध्यक्षभाषणे संस्थानकुलपतिः जगन्नाथधाम्नि पुर्याम् आयोजिते अस्मिन् कार्यक्रमे विदुषां प्रतिभागिनां च स्वागतं व्याहृत्य संस्कृतोन्नयनाय संस्कृतज्ञैः सम्भूय करणीयान् चिन्तनीयान् च अंशान् दृढं प्रास्तुवत्।




पुर्यां संस्कृतवार्तायाः द्वितीयाङ्कस्य लोकार्पणावसरे प्रह्लादाचार्यः, राधावल्लभत्रिपाठी, चन्दनसिंहकनियालः च

उद्घाटनसत्रानन्तरं पौरसदने व्याकरण-साहित्य-ज्यौतिष-वेदान्त-मीमांसा-धर्मशास्त्र-साङ्ख्ययोगविषयेषु भाषणस्पर्धाः प्रवर्तिताः। परिसरभवने न्याय-साहित्य-व्याकरणविषयेषु शलाकापरीक्षाः अष्टाध्यायीकण्ठ-पाठस्पर्धा च प्राचलन्।




समापनसमारोहे वामतः राजेन्द्रमिश्रः, प्रह्लादाचार्यः, राधावल्लभत्रिपाठी, कनियालः, जि.गङ्गन्ना

२५ दिनाङ्के प्रातः श्लोकान्त्याक्षरी समस्यापूर्तिः च आयोजिते आस्ताम्। विविधस्पर्धासु निर्णायकरूपेण प्रथितविद्वांसः आचार्याः—अभिराजराजेन्द्रमिश्रः, प्रह्लादाचार्यः, अशोककालिया, के.सुब्रह्मण्यः, रामसजीवनत्रिपाठी, गङ्गाधरपण्डा, श्रीमती पुष्पादीक्षिता, सच्चिदानन्दमिश्रः, के.सी. पाढी, डी.पी. त्रिपाठी, हरेकृष्णशतपथी, श्रीनिवासवरखेडी, बदरीनारायणपञ्चोली च उपस्थिताः आसन्।

२५ दिनाङ्के अपराह्णे ३.०० वादनतः प्रवृत्तायां समारोपसभायां आचार्याः- प्रह्लादाचार्यः, राजेन्द्रमिश्रः, पुष्पादीक्षित, पुरीपरिसरस्य प्राचार्यः जि.गङ्गन्ना, संस्थानस्य प्रभारीकुलसचिवः श्री चन्दनसिंहकनियालः, कुलपतिः आचार्यराधावल्लभत्रिपाठिमहोदयः इत्येते मञ्चमलङ्कृतवन्तः।

आचार्य-पुष्पादीक्षित-राजेन्द्रमिश्र-प्रह्लादाचार्याः विविधासु स्पर्धासु प्रतिभागिनां भागग्रहणस्य स्तरं नैपुण्यं च अधिकृत्य भाषितवन्तः। तेभ्यः अभिनन्दनवचनानि अकथयन्, न्यूनतापरिहारोपायविवरणपुरस्सरं तेषां मार्गदर्शनं च कृतवन्तः। कुलपतिना त्रिपाठिमहोदयेन कार्यक्रमसाफल्याय कारणीभूताः स्पर्धार्थिनः, परिसरपरिवारसदस्याश्च अभिनन्दिताः। शास्त्रीयविषयेषु छात्राणां समधिकतरम् उत्साहवर्धनाय नूतनाः सङ्कल्पनाः सभायामुद्घोषिताः। तासु, पुरस्कारराशिसंवर्धनम्, नूतनविषयेषु (ज्यौतिष-वेदान्त-अलङ्कार-पुराणेतिहास-विषयेषु) शलाकापरीक्षायोजनम्, प्राक्शास्त्रिच्छात्राणां कृते कोषकण्ठपाठ- स्पर्धायोजनं च अन्यतमाः। कुलपतिमहोदयेन आगामिनः वर्षस्य शलाकापरीक्षाविषयाश्च उद्घोषिताः। मञ्चस्थिताः अतिथिवरेण्याः विजयिभ्यः छात्रेभ्यः पुरस्कारान्, विजयपदकानि च प्रदाय अभिनन्दनं कृतवन्तः। डा. सुकान्तकुमारसेनापतिमहोदयः कार्यक्रमसाफल्ये हेतुभूतान् स्मृत्वा कृतज्ञतां न्यवेदयत्। राष्ट्रगीतेन सभा सम्पन्नतामगात्।



अ.भा.शा.सं.भा. स्पर्धा-कार्यक्रमावसरे समुपस्थिताः प्रेक्षकाः

**भाषणस्पर्धासु विजयिनः (प्रथम-द्वितीय-तृतीय-क्रमेण)**

| | विजयिनः नाम | संस्था-नाम |
|---|---|---|
| व्याकरणे | राजेन्द्रसावन्तः | रा.सं. विद्यापीठम्, तिरुपतिः |
| | प्रसन्नकुमारस्वाई | श्रीजगन्नाथ सं.वि.वि. पुरी |
| | चन्द्रकान्तशर्मा | राजस्थान-आचार्य सं. महावि., जयपुरम् |
| साहित्ये | मञ्जुनाथरावभट्टः | श्रीमाता सं. महा. उम्मचगि, कर्णाटकम् |
| | चक्रधरमेहरः | रा.सं.विद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः |
| | कृष्णकुमारकोटनालः | श्री ला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली |
| न्याये | सग्रिआनन्दतीर्थः | पूर्णप्रज्ञ वि. बेङ्गलूरु, कर्नाटकम् |
| | नरेन्द्रभारती | रणवीरपरिसरः, जम्मू |
| | योगेश अत्रिः | गरलीपरिसरः, हिमाचलप्रदेशः |
| सांख्ययोगे | तेजस्वीभट्टः | शृङ्गेरीपरिसरः, कर्नाटकम् |
| | सुश्रीः सङ्गीता त्रिपाठी | पुरीपरिसरः, उडीसा |
| | भास्करभट्टजोशी | रा.सं.वि.पी., तिरुपतिः |
| मीमांसायां | विनायकभट्टः | शृङ्गेरीपरिसरः, कर्नाटकम् |
| | दूबे अङ्गदः ए. | दर्शनम् सं. महावि. अहमदाबाद |
| | ए.एस्.श्रीरामः | रा.सं.वि.पी., तिरुपतिः, आन्ध्रप्रदेशः |
| वेदान्ते | दयानन्दपाणिग्रही | पुरीपरिसरः, उडीसा |
| | लहेरु तुषारः पी. | स्वामीनारायण सं.वि. अहमदाबाद |
| | सतीशकुमारः एस्. | मद्रपुरी सं. महा.वि. चेन्नै, तमिलनाडु |
| धर्मशास्त्रे | प्रकाशचन्द्रमिश्रः | रा.सं.विद्यापीठम्, तिरुपतिः, आ. प्र. |
| | गणपतिभट्टः | महाराजा सं. महा.वि., मैसूरु |
| | सुब्रह्मण्यः के. | मद्रपुरी सं.वि. चेन्नै, तमिलनाडु |
| ज्योतिषे | वासुदेव जोयिस् | उडुपी, कर्नाटकम् |
| | गणेशः के. | मद्रपुरी सं.महा.वि., चेन्नै, तमिलनाडु |
| | रामेश्वरशर्मा | रा.सं.सं., जयपुरपरिसरः, राजस्थानम् |
| अष्टाध्याय्यां | प्रमोदभट्टः | शृङ्गेरीपरिसरः, कर्णाटकम् |
| | गणेशदेव-आर्यः | मुम्बईपरिसरः, महाराष्ट्रम् |
| | लवकुमारः टी | मद्रपुरी सं.महा. चेन्नै, तमिलनाडु |
| | दिनेशकुमारः | लखनऊपरिसरः, उत्तरप्रदेशः |
| समस्यापूर्तौ | सुब्रह्मण्यः के. | मद्रपुरी सं.वि. चेन्नै, तमिलनाडु |
| | हेमचन्द्रबेलवालः | भगवान्दास-आदर्श सं.महावि. हरिद्वारम् |
| | लहेरुतुषारः पी. | स्वामीनारायण सं महावि. अहमदाबाद |
| अन्याक्षर्यां | सुब्रह्मण्यः एन् | मद्रपुरी सं महावि. चेन्नै, तमिलनाडु |
| | भीमसेनगुत्तलः | पूर्णप्रज्ञविद्यापीठम् बेङ्गलूरु, कर्णाटकम् |
| | गणेशः के. | मद्रपुरी सं महावि. चेन्नै, तमिलनाडु |

**शलाकापरीक्षासु पुरस्कारभाजः**

| | | |
|---|---|---|
| व्याकरणे | दीपककुमारकोठारी | भगवानदास-आदर्श स. महावि. हरिद्वारम् |
| | प्रमोदभट्टः | रा.सं.सं., शृङ्गेरीपरिसरः, कर्णाटकम् |
| | विनोदः एम्. | आहोबिलमठ. आ.सं.म. मधुरान्तकम्, तमिल. |
| न्याये | भीमसेनगुत्तलः | पूर्णप्रज्ञविद्यापीठम् संस्कृतकालेज् बेङ्गलूरु |
| | जीष्मागुणसीङ् | रा.सं.सं. गुरुवायूरुपरिसरः, केरलम् |
| | कार्तिकेयः एन्. | मद्रपुरी सं महावि. चेन्नै, तमिलनाडु |
| साहित्ये | सौम्या के. आर्. | रा.सं.सं.शृङ्गेरीपरिसरः, कर्णाटकम् |
| | जितेन्द्रमिश्रः | श्रीजगन्नाथसंस्कृत वि.वि., पुरी, उडीसा |
| | सन्दीपकुमारः | रा.सं.सं. लखनऊ परिसरः, उत्तरप्रदेशः |

# अभिनन्दनम्

४७तमा अखिलभारतीयशास्त्रीयभाषणस्पर्धाः शलाकापरीक्षाः च २००९ वर्षस्य दिसम्बरमासे भविष्यन्ति। कोषकण्ठपाठनिमित्तं शलाकापरीक्षा-निमित्तं च अधोनिर्दिष्टविषयाः ऐषमः अ.भा.शा.सं.भा.स्पर्धाकार्यक्रमस्य समापनसभायाम् उद्घोषिताः–

| | विषयः/शास्त्रम् | ग्रन्थः | स्तरः |
|---|---|---|---|
| १. | कोषकण्ठपाठः | अमरकोषः (प्रथमकाण्डम्) | प्राक्शास्त्री/मध्यमा |
| २. | काव्यशलाका | रघुवंशम् (१ तः ६ सर्गाः) | आचार्यः |
| ३. | साहित्यशलाका | काव्यप्रकाशः (१-५ उल्लासाः) | ,, |
| ४. | न्यायशलाका | न्यायसिद्धान्तमुक्तावली (प्रत्यक्षकाण्डम्) | ,, |
| ५. | व्याकरणशलाका | महाभाष्यम् (पस्पशाह्निकम्) | ,, |
| ६. | ज्यौतिषशलाका | सूर्यसिद्धान्तः (त्रिप्रश्नाधिकारपर्यन्तम्) | ,, |
| ७. | वेदान्तशलाका | ब्रह्मसूत्र-शाङ्करभाष्यम् (चतुस्सूत्री) | ,, |
| ८. | पुराणेतिहासशलाका | | |

१. श्रीमद्भागवतम् (१-५ स्कन्धाः) २. वाल्मीकिरामायणम् (१-३ काण्डाः) ३. महाभारतम् (आदिपर्व. १-३ अध्यायाः)

## नवनियुक्ति:

संस्थाने अनतिपूर्वं सम्पन्नेषु साक्षात्कारेषु चिता: अधोनिर्दिष्टा: तत्तत्पदेषु विभिन्नपरिसरेषु नियुक्ता:-

नवनियुक्तेभ्य: अभिनन्दनम्

प्राचार्यपदे

१. डा. आजादमिश्र:, भोपालपरिसरे

२. डा. प्रकाशपाण्डेय:, गरलीपरिसरे

प्रवाचकपदे

| नाम | शास्त्रम् | परिसर: |
|---|---|---|
| डा. सुब्राय वि. भट्ट: | मीमांसा | शृङ्गेरी |
| डा. ए. के चौबे | बौद्धदर्शनम् | लखनऊ |
| डा. अनेकान्तकुमारजैन: | जैनदर्शनम् | जयपुरम् |
| डा. के. ई. मधुसूदन: | न्यायम् | गुरुवायूरु |

व्याख्यातृपदे

| नाम | शास्त्रम् | परिसर: |
|---|---|---|
| डा. सूर्यनारायणभट्ट: | मीमांसा | शृङ्गेरी |
| श्रीसतीशकुमार: | साहित्यम् | जम्मू |
| डा. रत्नमोहनझा | दूरस्थशिक्षा | मुख्यालय: |
| श्री कु. वेङ्कटेशमूर्ति: | दूरस्थशिक्षा | मुख्यालय: |
| डा. अजयमिश्र: | दूरस्थशिक्षा | मुख्यालय: |
| डा. मखलेशकुमार: | पुराणेतिहास: | पुरी |
| डा. विजेन्द्रशर्मा | ज्योतिषम् | जयपुरम् |
| डा. अशोकतप्लियाल: | ज्योतिषम् | भोपालम् |
| श्रीहरिनारायणधरद्विवेदी | ज्योतिषम् | जम्मू |
| डा. विश्वरञ्जनपति: | ज्योतिषम् | पुरी |
| श्री अशोककुमारमीना | साङ्ख्ययोगम् | जम्मू |
| डा. गणपतिशुक्ल: | न्यायम् | पुरी |
| डा. रेखापाण्डेया | हिन्दी | शृङ्गेरी |
| श्री गौरङ्गबाग: | शिक्षाशास्त्रम् | जम्मू |
| सुश्री लीना सभर्वाल | शिक्षाशास्त्रम् | जयपुरम् |
| श्री शीशाराम: | शिक्षाशास्त्रम् | जम्मू |
| डा. वेङ्कटरमण एस्. भट्ट: | शिक्षाशास्त्रम् | गुरुवायूरु |
| श्री नीलाभतिवारी | शिक्षाशास्त्रम् | भोपालम् |
| श्री गणेशतिम्मन्नपण्डित: | शिक्षाशास्त्रम् | शृङ्गेरी |
| श्री रवारि गायत्रीमुरलीकृष्ण: | शिक्षाशास्त्रम् | मुम्बई |
| श्रीपवनकुमारशर्मा | साहित्यम्* | पुरी |
| सुश्री मोहिनी अरोडा | साहित्यम्* | गरली |
| श्री कुलदीपशर्मा | शिक्षाशास्त्रम्* | लखनऊ |

ग्रन्थपालपदे

| | | |
|---|---|---|
| डा. अवधेशकुमारकौशिक: | ग्रन्थपालक: | पुरी |
| श्रीमती स्नेहलता-उपाध्याय | ग्रन्थपालिका | भोपालम् |

* विरामकालिकरिक्तिपूर्ति:

### प्रोन्नता: कर्मचारिण:

मुख्यालये कार्यालयसहायिकात्वेन कार्यं कृतवती श्रीमती नीलमघई अनुभागाधिकारित्वेन पदोन्नतिं प्राप्य मुम्बई-परिसरे नियुक्ता।

मुख्यालये कार्यरता: वरिष्ठलिपिका: कार्यालयसहायकत्वेन प्रोन्नता:-

१. श्री नवलसिंह:
२. श्री विमलकपूर:
३. श्री बिमलकपूर:
४. श्री नवीनकुमारगुप्ता

कनिष्ठलिपिका: वरिष्ठलिपिकत्वेन प्रोन्नता:-

१. श्री राजीवधण्ड:
२. श्री सुरेशचन्द:
३. श्री भगवानदास:
४. श्री अनिलकुमारनौटियाल:

| दफ्तरीरूपेण प्रोन्नत: | चतुर्थवर्गकर्मचारित्वेन नियुक्ता |
|---|---|
| श्री कल्लूलाल: | श्रीमती सुमन |

### सेवाकालं पूरितवन्त: कर्मचारिण:

- १९७१तमे वर्षे रा.सं.संस्थानस्य सेवायां प्रविष्ट: श्री हरभजनसिंह: सन्धु: उत्तरोत्तरम् वृद्धिं प्राप्य प्रशासनविभागे उपकुलसचिवत्वेन कार्यं निर्वाह्य २००९ तमे वर्षे जनवरीमासे सेवाविरतिम् अलभत।
- श्रीरामरतन: जम्मूस्थरणवीरपरिसरे आदेशपालत्वेन ३१-१-२००९ दिनाङ्के स्वीयसेवाकालं पूरितवान्।
- श्री के.पी. कुचूदेर्सी, गुरुवायूरुपरिसरस्य चतुर्थवर्गीयकर्मचारी २८-०२-०९ तमे दिनाङ्के सेवानिवृत्त: अभवत्।

संस्थाने सेवां कृतवद्भ्य: एतेभ्य: भगवान् आयुरारोग्यादिभाग्यं दद्यात् इति आशास्ते संस्थानपरिवार:।



गणतन्त्रदिनोत्सवम् आचरन्त: गुरुवायूरुपरिसरसदस्या:

### गरलीपरिसरे

#### गणतन्त्रदिवस: परिपालित:

२६.१.०९ दिनाङ्के गणतन्त्रदिवसम् उपलक्ष्य कार्यक्रम: समायोजित:। परिसरप्राचार्येण डा. सुरेन्द्रझामहोदयेन ध्वजारोहणं कृतम्। कार्यक्रमेऽस्मिन् परिसरीयाध्यापका:, कर्मचारिण: छात्राश्च सश्रद्धं भागमवहन्। छात्रै: देशभक्तिगीतादिभि: राष्ट्रवन्दना कृता।

#### सरस्वतीमहोत्सव:

३१.१.०९ दिनाङ्के डा. मदनमोहनपाठकस्य संयोजकत्वे डा. एस्. एन्. तिवारी, डा. एस्. के. त्रिपाठी इत्यनयो: सहभागित्वे सरस्वतीमहोत्सवस्यायोजनं कृतम्। परिसरपरिवारसदस्या: सोत्साहं समुपस्थिता: आसन्।

# युवमहोत्सवे संस्कृतध्वनिना गुञ्जायितः पुरीपरिसरः



युवमहोत्सवे गुरुवायूरुपरिसरच्छात्रैः प्रस्तुतस्य स्वागतनृत्यस्य एकं दृश्यम्

अन्तःपरिसरीयसंस्कृतयुवमहोत्सवः दिसम्बरमासस्य २० तः २२ दिनाङ्कं यावत् पुर्यां सदाशिवपरिसरे सम्पन्नः। अस्मिन् महोत्सवे आयोजितासु साहित्य-सङ्गीत-रङ्गमञ्च-चित्रकला-क्रीडादिस्पर्धासु संस्थानस्य विभिन्नपरिसरेभ्यः समागताः छात्राः सोत्साहं भागमवहन्।

कार्यक्रमस्य उद्घाटनसत्रं पुरीस्थपौरसदने सम्पन्नम् अभवत्। डा. हरेकृष्णमहापात्रमहोदयेन गीतेन जगन्नाथाष्टकेन गुरुवायूरुपरिसरच्छात्रैः प्रस्तुतेन स्वागतनृत्येन च कार्यक्रमस्य शुभारम्भो जातः। कार्यक्रमे मुख्यातिथिरूपेण श्री जगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः गोपीनाथमहापात्रः, अध्यक्षरूपेण च तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः हरेकृष्णशतपथिः समुपस्थाय छात्रान् समुत्साहितवन्तौ। परिसरप्राचार्यः गङ्गन्नामहोदयः आहूतान् विदुषः पुष्पगुच्छादिभिः सममानयत्। उद्घाटनसत्रे विभिन्नपरिसराणां निपुणैः छात्रैः प्रस्तुतं योगासनप्रदर्शनं दर्शकानां चेतोहारि आसीत्। उद्घाटनानन्तरं दिनद्वयं प्रवृत्तासु शैक्षिकस्पर्धासु स्तोत्रपाठ-वादविवाद-प्रश्नमञ्चस्पर्धाः अन्तर्भूताः। चित्रकलास्पर्धासु आशुचित्रण-व्यङ्ग्यचित्रण-भित्तिपत्रनिर्माण-रङ्गवल्लीनिर्माणस्पर्धाः छात्राणां प्रतिभापरीक्षणाय अकल्पन्त। सांस्कृतिकस्पर्धासु एकलसङ्गीत-शास्त्रीयगायन-वादन-नृत्य-अभिनयस्पर्धाः आसन्। षोडशविधक्रीडास्पर्धाः अपि संस्कृतयूनां भागग्रहणेन सफला अभवन्। विविधाः स्पर्धाः समकालमेव विभिन्नकक्षेषु प्रवर्तन्ते स्म।

प्रथमे दिने स्तोत्रपाठस्पर्धा, भित्तिपत्रकस्पर्धा, गीतप्रतिस्पर्धा, रङ्गवल्ली च आयोजिताः अभवन्। सायं भोपालपरिसरच्छात्रदलेन 'सीताच्छायम्' इति रूपकस्य आह्लादजनकप्रस्तुतिः कृता।




राजेन्द्रमिश्रः, गोपीनाथमहापात्रः, हरेकृष्णशतपथी, जि.गङ्गन्ना, हरभजनसन्धूः च

द्वितीये अहनि चित्रकला-वादविवाद-शास्त्रीयगायन-वादन-एकपात्राभिनयप्रभृतयः स्पर्धाः सम्पन्नाः। सायं शृङ्गेरीपरिसरस्य नाटकदलेन 'आश्चर्यचूडामणि' इति नाटकं प्रस्तुत्य सहृदयानां हृदयरञ्जनं कृतम्।

महोत्सवस्य अन्तिमे दिने व्यङ्ग्यचित्रण-सृजनशीलरचना-प्रश्नमञ्च-शास्त्रीयनृत्यप्रभृतीनां स्पर्धानाम् आयोजनमभूत् यत्र प्रश्नमञ्चः समेषां विशिष्टाकर्षणकारणम् आसीत्। सायं गुरुवायूरुपरिसरच्छात्रैः कृता 'पञ्चकल्याणी' इति नाटकप्रस्तुतिः सभ्यानां चेतोहारिणी आसीत्। त्रिष्वपि दिनेषु अन्यस्पर्धायोजन-समकालमेव विविधाः क्रीडास्पर्धाः क्रीडाङ्गणे प्राचलन्।

एतासु विभिन्नासु स्पर्धासु निर्णायकरूपेण आचार्याः– अभिराजराजेन्द्रमिश्रः, अन्विताशर्मा, भागीरथीनन्दः, पङ्कजकुमारमिश्रः, ललितमोहनः, जी.के. दूबे, सन्दीपतिवारी, राजेन्द्रसिंहः, शुक्ला, जे.एस्. नरूका, गुरुदीपसिंहः, गणेशशङ्करगिरिः, बलदेवमेहराः - इत्यादयः अतुलनीयं सहयोगमकुर्वन्। डा. वै.एस्. रमेशः, डा. सेनापतिः, गोविन्दपाण्डेयः, डा. शुक्लामुखर्जी, डा. रत्नमोहनझा-प्रभृतयः, सदाशिवपरिसरस्य प्राचार्यप्रमुखाः सर्वे सदस्याः कार्यक्रमसाफल्याय प्रायतन्त। २२ दिनाङ्के रात्रौ पौरसदने पुरस्कारप्रदानकार्यक्रमेण युवमहोत्सवः सम्पन्नतां गतः। संस्थानस्य कुलपतेः आचार्यराधावल्लभत्रिपाठिमहोदयस्य आध्यक्ष्ये प्रवृत्ते एतस्मिन् समापनसत्रे श्रीजगन्नाथ-सं.वि.विद्यालयस्य कुलपतिचरः आचार्यः आलेखचन्द्रषडङ्गी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः राजेन्द्रमिश्रः च अतिथिरूपेण मञ्चमलङ्कृत-वन्तौ। कुलपतिप्रभृतिभिः एभिः विद्वद्भिः अभिनन्दनवाक्यैः आशीर्वचोभिश्च सर्वे भागग्राहिणः अनुगृहीताः, विजयिनश्च पुरस्कारप्रदानेन प्रोत्साहिताः।




कबड्डी-स्पर्धायाः एकं दृश्यम्

## युवमहोत्सवे प्रथम-द्वितीय-तृतीय-क्रमेण पुरस्कारं प्राप्तवतां नामानि



अ.भा.शा. वाक्स्पर्धासु विजयवैजयन्तीं प्राप्तवन्तः कर्णाटकच्छात्राः

### शैक्षिकस्पर्धासु

स्तोत्रपाठे–आर्या पी.एम., सुव्रतषडङ्गी, हेमन्तः
वादविवादे–सोनलकुमारजैनः, त्रिलोचनपलेई, प्रियव्रतमिश्रः
साहित्यरचनायाम्–पवनकुमारः, यदुवीरस्वरूपः, नरेन्द्रभारती
प्रश्नमञ्चे–अभिषेक-आलोकौ, प्रियव्रतमिश्र-कुमुदरावौ,
राधाकान्तपण्डा-कुन्दनकुमारमिश्रौ

### कलास्पर्धासु

भित्तिपत्रके–विनय एच.वी., समिनु पी.आर्., राहुलवर्मा
रङ्गवल्लीस्पर्धायाम्–ज्यौत्सना दे, प्रतीक्षा सोनी, शीतल
आशुचित्रणे–नर्मदा एम.एम., मुकेशशर्मा, विनय एच.वी.
शास्त्रीयगायने–विनायकभट्टः, गायत्री के., माहेश्वरी एम.
शास्त्रीयवादने–रमानन्दनशर्मा, सौम्य के.आर्.
शास्त्रीयनृत्ये–नीतू टी.सी., शिवानीप्रियदर्शिनी, अश्विनीहेगडे
संस्कृतगीते–विनायकभट्टः, विनयकुमारपाण्डेयः,
शुभा एस., (प्रोत्साहनं–स्मृतिरञ्जनराउतः)
एकपात्राभिनये–रवीशहेगडे, हरिहरपण्डा, (विशेषपुरस्कारः–निधि पी.के.)
व्यङ्ग्यचित्रणे–प्रज्वलताभट्टाचार्य, राममूर्तिः एस.जि., नर्मदा एम.

### क्रीडास्पर्धासु

१०० मीटरधावने (पुं.)–सोनूशर्मा, सुभाषचन्द्रदाशः, विनयकुमारवैष्णवः
१०० मीटरधावने (स्त्री.)–तुषारहेगडे, सरोजिनीतराई, अञ्जु एम.
२०० मीटरधावने (पुं.)–राजवीरसिंहः, कैलाशचन्द्रमीणा, रनीश सी.के.
२०० मीटरधावने (स्त्री.)–सरोजिनीतराई, तुषारहेगडे, सारिकाशर्मा
४०० मीटरधावने (पुं.)–विनयकुमारवैष्णवः, रोहिताशः, सौम्यारञ्जनकरः
४०० मीटरधावने (स्त्री.)–लक्ष्मीप्रियामानसिंह, सारिकाशर्मा, रीतूकुमारी
८०० मीटरधावने (पुं.)–कैलाशचन्द्रमीणा, राजवीरः, रोशनलालः
१५०० मीटरधावने (पुं.)–जगदीशप्रसादमीणा, रोहिताशः, रोशनलालः
दीर्घकूर्दने (पुं.)–विनयकुमारवैष्णवः, योगेशकुमारमीणा,
सुभाषचन्द्रदाश-मनीषकुमारौ
दीर्घकूर्दने (स्त्री.)–अञ्जू एम., लक्ष्मीप्रिया मानसिंह, सारिकाशर्मा
उच्चकूर्दने (पुं.)–प्रियव्रतमिश्रः, जगदीशप्रसादमीणा, सुमितकुमारः
उच्चकूर्दने (स्त्री.)–लक्ष्मीप्रियामानसिंह, उषा प्रजापति, सीमादेवी
गोलकक्षेपणे (पुं.)–रोहिताशः, कुलदीपसिंहः (जम्मू),
कुलदीपसिंहः (जयपुर)
गोलकक्षेपणे (स्त्री.)–रीतूकुमारी, सजना अनूजा एम.बी., रेणू शर्मा
चक्रक्षेपणे (पुं.)–केदारपाण्डेयः, राहुलपुरोहितः, विकासवर्धनभारती



युवमहोत्सवे विजयवैजयन्तीं प्राप्तवन्तः शृङ्गेरीच्छात्राः

चक्रक्षेपणे (स्त्री.)–सजना अनूजा एम.बी., मीरायादव, स्वागतिका स्वॉई
कुन्तक्षेपणे (पुं.)–धीरजकुमारः, मनोजकुमारः, कुलदीपसिंहः
बैडमिण्टनक्रीडायाम् (स्त्री.)–नीतू-रेनू, सुषमा-रीना
बैडमिण्टनक्रीडायाम् (एकाकि)बालकस्य–कमलेशकुमारः, रूपेशकुमारः
बैडमिण्टनक्रीडायाम् (एकाकि)बालिकायाः– नीतूशर्मा, सुषमाकुमारी
बैडमिण्टनक्रीडायाम् (युगल)बालकयोः–राहुलअवस्थी-करणशर्मा,
रूपेशकुमार-सुमितशर्मा
बैडमिण्टनक्रीडायाम् (युगल)बालिकयोः–नीतूशर्मा-रेनूशर्मा,
सुषमाकुमारी-रीनादेवी
हस्तकन्दुके (पुं.)– (शृंगेरी) नागानन्द जी. सी., तेजस्वी-भट्टः,
विनायक एस. भट्टः, अप्पलनायडू, सन्दीपकुमारः,
मधुकेश्वरहेगडे, दीपकहेगडे, राजेन्द्र एम. भट्टः
हस्तकन्दुके (पुं.)– (जम्मू) दीपकशर्मा, कमलेशः,
पुनीतपुरोहितः, पॉडेलउमेशः, अंकुशशर्मा,
पंकजकुमारः, नीरजशर्मा, नरेशकुमारः
कबड्डी (पुं.)– (लखनऊ) रोहिताशः, नवीनः, शीशपालः,
देवेन्द्रः, विनयः, सचिनः, रामजी उपाध्यायः,
विकासतिवारी, इन्द्रभूषणतिवारी, यशवीरसिंहः
कबड्डी (पुं.) - (जम्मू) कुलदीपः, पवनकुमारः,
दिनेशकुमारः, हंसराजः, रोहनशुक्ला, गोबिन्दलालः,
महेन्द्रपालः, विनोदकुमारः, जीतेन्द्रकुमारः
५० के. जी. मल्लयुद्धे (पुं.) - महेन्द्रकुमारः, कुन्दनः, हरीशकुमारः
५५ के. जी. मल्लयुद्धे (पुं.) - सुशान्तकुमारः, जयप्रकाशः,
सियाराममाली-संजीवकुमारौ
६० के. जी. मल्लयुद्धे (पुं.) - अनुजकुमारः, गोविन्दलालः,
पुनीतसयना-चुन्नीलालौ
६६ के. जी. मल्लयुद्धे (पुं.) - रोहिताशः, नवीनः, योगेशकुमारमीणा
७४ के. जी. मल्लयुद्धे (पुं.) - सतपालः, हरीशकुमारः,
देवेन्द्र-अनिलकुमारौ
चतुरङ्गे - एस. अपालनायडू, तेजस्वि भट्टः, रुद्रनारायणरथः

### विशेषप्रदर्शनम्

योगासने - रोहितासकुमारः, हंसराजः, नवीनकुमारः
बाक्सिंगक्रीडायाम्- मदनलालयादवः, प्रदीपकुमारशर्मा, रजनीशशर्मा
जूडोक्रीडायाम् - कन्हैयालालयादवः, सुनीलकुमारमीणा

## भोपालनगरे अखिलभारतीय-संस्कृतनाट्योत्सवे

- **अभिमञ्चिता नाट्यकृतयः।**
- **नाट्यशास्त्रपरम्परायाः नवीनाः सम्भावनाः प्रकाशिताः।**



कौमुदीमहोत्सवस्मरणिकायाः लोकार्पणावसरे राजेन्द्रमिश्रः, कमलेशदत्तत्रिपाठी, राधावल्लभत्रिपाठी, पणिक्करः, के.एस्.राजेन्द्रन्, आजादमिश्रः च।

राष्ट्रियसंस्कृतसंस्थानेन भोपालनगरे भारतभवने मार्चमासस्य २०तः २२ पर्यन्तम् अखिलभारतीयसंस्कृतनाट्योत्सवः आयोजितः। अस्मिन्नुत्सवे प्रत्यहं पूर्वाह्णे 'संस्कृत-रङ्गमञ्चपरम्परा-सम्भावनाश्च' इति विषये परिसंवादः, अपराह्णे च विविधनाट्यकृतीनां मनोहारिणी प्रस्तुतिः च अभवत्। २०-३-०९ दिनाङ्के पूर्वाह्णे उद्घाटनसत्रे भाषमाणः नाट्यशास्त्रे कृतभूरिपरिश्रमः संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी भारतीयनाट्यशास्त्रपरम्परायाः उत्कृष्टतां विवृण्वन् स्वविचारं प्रस्तुतवान् यत् विगतेषु चतुर्षु दशकेषु नाट्यशास्त्रपरम्परया संस्कृतरङ्गमञ्चस्य नवाः सम्भावनाः प्रकटिताः। तत्र तिस्रः दिश उद्घाटिताः। एका नाट्यशास्त्रसम्मतरीत्या संस्कृतनाटकानां प्रयोगस्य, द्वितीया लोकनाट्यैः पारम्परिकनाट्यरूपैश्च विविधतत्त्वजातं सङ्गृह्य प्रयोगस्य, तृतीया च आधुनिकसरण्या संस्कृतनाटकानाम् आधुनिकनाटकानां च भरतसम्मतदिशा प्रयोगस्य चेति। संस्कृतरङ्गमञ्चस्य संरक्षणाय, प्रोत्साहनाय च राष्ट्रियसंस्कृतसंस्थानं यथोचितं क्रियानुष्ठानं करिष्यतीत्यपि कुलपतिमहोदयेन प्रत्यपादि। कार्यक्रमे सारस्वतातिथित्वेन समुपस्थितः नाट्यशास्त्रवेत्ता आचार्यः कमलेशदत्तत्रिपाठिवर्यः न्यगादीत् यत् वस्तु-नेतृ-रसाः इति तिस्रः कोटयः आधुनिककलाजगति विपरिवर्तिताः। योरोपीयः रङ्गमञ्चः भारतेऽप्यवातरत्। संस्कृतनाटकानाम् आधुनिककाले नवाविष्कारे भारतेन्दु-प्रसाद-प्रभृतिभिः किमप्यवदानं कृतम्। भाषायां परिवर्तितायामपि रङ्गभाषा सैवेति, संस्कृतनाटकं तेषु तेषु लोकनाट्येषु जागर्ति स्म। संस्कृतरङ्गकर्म छायाचित्रवत् अनुकृतिर्नास्ति। तत्र यथार्थतया अनुकरणं न भवति। भावानुकीर्तनं भवति-आत्मपरिचयपुरस्सरं परम्परापरिचयस्तत्र मार्गः। अद्यत्वे उन्मुक्तवाणिज्यस्य, भूमण्डलीकरणस्य प्रौद्योगिक्याश्च महान् प्रभावः वर्तते इति। सम्पूर्णानन्दविश्वविद्यालयस्य भूतपूर्वकुलपतिः आचार्यः राजेन्द्रमिश्रः अब्रवीत् यत् नाट्यशास्त्रपरम्परायाः सामग्र्येण अवबोधाय मलेशियादेशस्य इण्डोनेशियादेशस्य च नाट्यपरम्परायाः परिज्ञानमपेक्ष्यते। मलयपरम्परायां नाटकेषु विदूषकयोः द्वयोः उपस्थितिः भवतीति कश्चन विशेषः। अष्टादशोपपुराणानाम् आधारेण कृतनवरचनानां प्रस्तुत्या नवाविष्कारः कार्यः। लोकानुरूपं संस्कृतनाट्यपरम्परायाः प्रयोगः कार्यः। समसामयिकतत्त्वानामपि समावेशः अपेक्ष्यते इति प्रतिपादयता तेन स्वोपज्ञानां रूपकाणाम् – इन्द्रजालम्, स्वप्नाज्जागरणम्, इत्यादीनां विवरणं प्रदत्तम्। राष्ट्रियनाट्यविद्यालयात् समागतः विद्वान् डा. के.एस्. राजेन्द्रन् महाभागः अवदत् यत् नाट्यशास्त्रपरम्परा १९६० वर्षं यावत् कामपि परिणतिं प्राप। प्रायोगिकी परम्परा जीवद्रूपेषु आत्मानमाविष्कर्तुं प्रवृत्ता। नाट्यशास्त्रस्य अध्ययनमल्पम्, प्रयोगश्च देशे बहुतरः। संस्कृतनाटकस्य अनुशीलने इदानीमपि औपनिवेशिकी दृष्टिः विजृम्भते। नाटकस्य पाठः प्रवाहरूपः। नाटकस्य समसामयिकत्वं प्रयोक्तुः समसामयिकत्वेनैव सिद्ध्येत। नाट्ये संसारः प्रतीकमुद्रासु परिणमति। प्रतीकमुद्रा च पुनः संसारमुन्मीलयन्ति। 'सोपानम्'-इत्यस्याः नाट्यमण्डल्याः निदेशकः श्री कावालं नारायणपणिक्करः अवदत्-'मया कावालम्-ग्रामे कृषकाणां जीवने नाट्यशास्त्रस्य प्रायोगिकं रूपं प्रत्यक्षीकृतम्। पाठस्यातिक्रमणं कृत्वा उपपाठः निर्मीयते, तत्र नवीनाः सन्दर्भाः योज्यन्ते' इति।



परिसंवादे भाषमाणः हबीबतनवीरः

एतस्मिन् उद्घाटनसत्रे, राष्ट्रियसंस्कृतसंस्थानेन गतनवम्बरमासे नवदेहल्यां समायोजितस्य कौमुदीमहोत्सवस्य स्मरणिकारूपं पुस्तकं प्रकाशितम्। संस्थानेन पूर्वानुष्ठितकौमुदीमहोत्सवेषु प्रदर्शितानाम् उत्तम-नाट्यप्रस्तुतीनां सङ्कलनात्मिका सान्द्रमुद्रिका 'विंशतिका' इति (DVD) अपि लोकायार्पिता। उद्घाटनसत्रे समुपस्थितानां कृते भोपालपरिसरप्राचार्यः आजादमिश्रः धन्यवादं समार्पयत्।




सामगानरतौ प्रभाकरशास्त्रिबापटः पुण्डलीककृष्णभागवतः च

उद्घाटनसत्रात् परम् अपराह्णे सुश्री: आस्था त्रिपाठी ध्रुवागायनं प्रस्तुतवती। सामगानतपस्वी आचार्य: प्रभाकरशास्त्रिबापटमहोदय:, श्री पुण्डलीककृष्णभागवत: च सामवेदस्य राणायणीयपाठं श्रावितवन्तौ। सायं, केरलराज्यात् समागतेन 'सोपानम्' इति नाटकदलेन कावालं पणिक्करमहोदयस्य निर्देशने प्रदर्शितेन अभिज्ञानशाकुन्तलनाटकेन प्रेक्षका: मुग्धा अभवन्।

द्वितीयदिने पूर्वाह्णे प्रवृत्ते परिसंवादे अध्यक्षपदमलङ्कुर्वन् आचार्य: राजेन्द्रमिश्रवर्य: उक्तवान् यत् भरतमुनि: नाट्यशास्त्रे रङ्गमञ्चं, नाट्यगृहम्, नाट्यमण्डपम्, प्रकाशगृहम् इत्यादिनाम्ना व्यवहृतवान् इति। परिसंवादे उपस्थिता: आचार्य: क्षेत्रवासी पण्डा, डा. राकेशसोनी, आचार्य: इन्द्रमोहनसिंह:, श्री भगवतीलालराजपुरोहित:, डा. उदयनवाजपेयी, डा. रामलखनपाण्डेय:, डा. सङ्गीता गुन्देचा, कु. शिल्पी मिश्रा-इत्यादय: वक्तार: संस्कृतरङ्गमञ्चस्य परम्परां नवसम्भावनां च अधिकृत्य स्वीयान् विचारान् प्रकटीचक्रु:। द्वितीयदिनस्य अपराह्णे कंसवधप्रसङ्गमाश्रित्य संस्थानमुख्यालये कार्यरतेन वेङ्कटेशमूर्तिना यक्षगानशैल्या एकपात्राभिनय: कृत:। सायं ग्वालियरस्थया नाट्यायननामिकया नाटकमण्डल्या कुन्दमालानामकं मनोरञ्जकं नाटकं प्रदर्शितम्। नाट्योत्सवस्य तृतीये अहनि परिसंवादे डा. भारतेन्दुमिश्र:, श्री आलोकचटर्जी, डा. गजाननहेगडे, श्री सञ्जयद्विवेदी, डा. हरेराममिश्र:, डा. रमाकान्तपाण्डेय:, डा. धर्मेन्द्रकुमारसिंहदेव:, श्री अलखनन्दन:, डा. राघवेन्द्रभट्ट: इत्यादयो विद्वांस: स्वीयान् विचारान् व्यक्तीकृतवन्त:।

अन्ते अध्यक्षभाषणं कुर्वन् कालिदास-संस्कृत-अकादम्या: निदेशक: आचार्य: मिथिलाप्रसादत्रिपाठिवर्य: संस्कृतनाट्यप्रस्तुतीनां दर्शनाय समाज: उत्सहते, जनेषु संस्कृतरङ्गमञ्चविषयक: महान् समादर: वर्तत इति सोदाहरणं न्यरूपयत्। संस्थानकुलपति: आचार्य: राधावल्लभत्रिपाठिमहोदय: धन्यवादार्पणमकरोत्। अपराह्णे मणिपुरात् समागतेन नाट्यदलेन गीतगोविन्दस्य भावपूर्णा प्रस्तुति: कृता। सायं लखनऊस्थ-नीपारङ्गमण्डल्या प्रदर्शितं भगवदज्जुकीयम् इत्येतत् प्रहसनं सर्वजनरञ्जकमासीत्।



सोपाननाट्यदलेन मञ्चितम् अभिज्ञानशाकुन्तलम्



नीपारङ्गमण्डल्या प्रदर्शितस्य भगवदज्जुकीयस्य दृश्यम्

## कोलकातायां प्रवृत्ता पं. गौरीनाथशास्त्रिस्मृतिव्याख्यानमाला



व्याख्यानमालायाम् उपस्थिता: राधावल्लभत्रिपाठी, विजयबहादुरसिंह:, रमारञ्जनमुखर्जी राजेन्द्रमिश्र: च

फरवरीमासस्य द्वितीये अहनि कोलकातायां भारतीयभाषापरिषद: सभागारे पण्डितगौरीनाथशास्त्रि-स्मृतिव्याख्यानमालाया: प्रथमं व्याख्यानपुष्पं विकसितमभूत्। व्याख्यानमाला रा.सं. संस्थानेन, भारतीयभाषापरिषद:, श्रीसीतारामवैदिकआदर्शसंस्कृतमहाविद्यालस्य च सहयोगेन आयोजिता आसीत्। संस्थानकुलपते: आचार्य-राधावल्लभत्रिपाठिमहोदयस्य अध्यक्षतायां सम्पन्ने कार्यक्रमे 'विश्वसाहित्यपरिप्रेक्ष्ये भारतीयं सौन्दर्यशास्त्रम्' इति विषये व्याख्यातुं विशिष्टवक्तृरूपेण संस्कृतक्षेत्रे ख्यातनामा तिरुपतिस्थ-राष्ट्रियसंस्कृत-विद्यापीठस्य कुलाधिपतिचर: आचार्य: रमारञ्जनमुखर्जीमहोदय: आहूत आसीत्। आदौ भारतीयभाषापरिषद: निदेशक: आचार्यविजयबहादुरसिंह: स्वागतभाषणम-करोत् व्याख्यानविषयस्य आवश्यकतां च प्रत्यपादयत्। स्वीयव्याख्याने विदुषा मुखर्जीमहोदयेन पण्डितगौरीनाथशास्त्रिण: संस्कृतं प्रति योगदानं तद्व्यक्तित्वं कृतित्वं च परिचाय्य भारतीयसौन्दर्यशास्त्रस्य विविधान् पक्षान् आदाय विस्तृतं विवरणं प्रदत्तम्। रवीन्द्रनाथ-टैगोरारविन्दप्रभृति-तत्त्वदर्शिविचारकाणां मनीषितं व्याख्याय स भारतीय-सौन्दर्यशास्त्रस्य भूमण्डलीयं परिप्रेक्ष्यं विशदरूपेण प्रकटीकृतवान्। अध्यक्षभाषणं कुर्वन् कुलपति: त्रिपाठिवर्य: भारतीयसौन्दर्यशास्त्रस्य विकासयात्रां विशदीकुर्वन् तद्गतानां सम्भावनानां विश्लेषणपुरस्सरं आधुनिकसंस्कृतविदुषां तत्रावदानं प्रतिपादितवान्। कार्यक्रमेऽस्मिन् अभिराजराजेन्द्रमिश्र:, मानवेन्दुबनर्जी (संस्कृतसाहित्यपरिषत्सचिव:), सीतारामादर्श-वैदिकमहाविद्यालयीय-प्राचार्य: डॉ. सोमेशमिश्र:, बहुसंख्या नागरिका: पत्रकाराश्च उपस्थिता अभवन्। सञ्चालनं डॉ. अवधेशचौ. महोदयेन विहितम्।

# जयपुरपरिसरस्य रजतजयन्त्युत्सवः

## ❍ राष्ट्रियसङ्गोष्ठी

**जयपुरे १९८८ तमे ई. वर्षे केन्द्रीयसंस्कृतविद्यापीठनाम्ना लब्धजन्म शिक्षणकेन्द्रम् अद्य जयपुरनगरस्य महत्त्वपूर्णे स्थाने राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरत्वेन राराजते।**

**आरम्भिकदिनेषु तदानीन्तनाधिकारिणां स्व. मण्डनमिश्र-रामकरणशर्मप्रभृतीनां कुशलमार्गदर्शनेन, तदानीन्तनानाम् अध्यापकानां कर्मचारिणां च परिश्रमेण अनया संस्थया प्रौढता सम्पादिता, देशस्य पश्चिमदिग्भागे संस्कृतस्य प्रमुखकेन्द्रत्वेन च ख्यातिः लब्धा। गतवर्षे दिल्लीप्रशासनेन केन्द्रीयविद्यालयेन च चितेषु अभ्यर्थिषु अस्य परिसरस्य छात्राणां संख्या नैव अल्पीयसी इत्ययम् अंशः परिसरस्य गौरवं समेधयति। स्थापनाकालात् अद्य यावत् २५ वर्षाणां सफलक्रिया-कलापान् प्रपूर्य सम्प्रति अयं परिसरः २६ तमे वयसि पादार्पणमकरोत्। एवं रजतजयन्तीसमुत्साहम् उपलक्ष्य जयपुरपरिसरे विशिष्टाः कार्यक्रमाः आयोजिताः। तद्विषयिण्यः वार्ताः पार्श्वे अवलोक्यन्ताम्।**

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरस्य रजतजयन्तीवर्ष-मालक्ष्य जयपुरपरिसरेण ''आधुनिकं संस्कृतसाहित्यम् - समस्याः सम्भावनाश्च'' इति विषये २००९ वर्षस्य जनवरीमासस्य ८-१० दिनाङ्कं यावत् त्रिदिवसात्मिका राष्ट्रिया सङ्गोष्ठी समायोजिता। सङ्गोष्ठ्या अस्या उद्घाटनसत्रस्य आध्यक्ष्यं कुलपतिना आचार्यराधा-वल्लभत्रिपाठिना, मुख्यातिथित्वम् आचार्यरामकरणशर्मणा, सारस्वतातिथित्वञ्च देवर्षिकलानाथशास्त्रिणा समलङ्कृतम्।

उद्घाटनसत्रे सर्वप्रथमं अतिथिभिः सरस्वतीपूजनं दीपप्रज्वालनञ्च विहितम्। अस्मिन्नवसरे सारस्वतातिथिना आधुनिकसंस्कृतकविभिः काव्येषु क्रियमाणानां नवीन-प्रवृत्तीनां विषये समालोचनं कृत्वा सम्प्रति आगतानां समस्यानां विषये चर्चा कृता। तेनोक्तं यदिदानीं संस्कृतकाव्ये समसामयिकता नूतनरचनाशैली च आगच्छन्त्यौ दृश्येते। विविधविधोदाहरणैः तेन स्पष्टीकृतं यत् साम्प्रतिके काव्ये बिम्बानां प्रयोगेण काव्यस्य नूतनैव सृष्टिर्जायमानाऽस्ति, क्वचिज्जायमानं भाषाप्रमादं विहाय। अस्मिन्नेव क्रमे आचार्यरामकरणशर्मणा स्वीयवक्तव्ये संस्कृते साहित्यरचनायाम् आगम्यमानानां नवाचाराणां विषये, तेषां सम्भावनाक्षेत्रविषये च निगदितम्। सत्रस्यास्य सञ्चालनं संगोष्ठ्याः संयोजनं च परिसरस्य साहित्यविभागस्य सहाचार्येण डा. रमाकान्तपाण्डेयेन कृतम्।



सङ्गोष्ठ्यां शोधसारस्य लोकार्पणं कुर्वन्तः विद्वांसः, वामतः हिन्दकेसरी, रामकरणशर्मा, राधावल्लभत्रिपाठी कलानाथशास्त्री च

समारोहेऽस्मिन् संस्थानस्य सेवां कृतवतां विदुषामपि सम्माननं कुलपतिना कृतम्। तेन सम्मानपत्रेण पं. आर्.महादेवन्-पं. मदनमोहनशर्म-पं. कृष्णचन्द्रचतुर्वेद-डा. रूपनारायणत्रिपाठि- डा. सतीशकीलावताश्च सम्भूषिताः। वेलायामस्यां प्राचार्येण श्रीहिन्दकेसरिणा सत्रान्ते धन्यवादज्ञापनं कृतम्। अवसरेऽस्मिन् अशैक्षिक-कर्मचारिणामपि सम्माननं कुलपतिनाचरितम्। कार्यक्रमस्यास्य प्रौढं स्तरं सम्वीक्ष्य स्थानीयराष्ट्रियसमाचारपत्रकारैः दूरदर्शनसंवाददातृभिश्च कार्यक्रमाय पर्याप्तमवधानं दत्तम्। संगोष्ठ्यामस्यां ८५ शोधपत्राणि पठितानि द्विशताधिकविद्वद्भिश्च भागः गृहीतः।

उद्घाटनसत्रात् परं देशस्य नानादिक्कोणेभ्यः समागतैर्विद्वद्भिः संगोष्ठीविषयमाश्रित्य स्वीयं वक्तव्यं मञ्चादभिव्यक्तम्। तत्रादौ प्रथमसत्रे प्रो. प्रभुनाथद्विवेदिनः आध्यक्ष्ये प्रो. यदुनाथप्रसाददुबे- डा. हर्षदेवमाधव- डा. विजयकुमारपाण्डेय- डा. जनार्दनपाण्डेय- डा. बलदेवानन्दसागर- प्रो. प्रभुनाथद्विवेदिवर्याणां पत्रवाचनं जातम्। अस्मिन् सत्रे यथार्थपरककाव्यस्य वास्तवस्य निरूपणे काः काः सम्भावनाः वर्तन्ते काश्च समस्याः सन्ति इति विमृश्य तासां समस्यानां विषये विचारः प्रस्तुतः। अपराह्णे जाते द्वितीयसत्रे आचार्यराधावल्लभत्रिपाठिवर्यस्य आध्यक्ष्ये आचार्यमिथिलाप्रसाद- डा. सूर्यमणिरथ- प्रो. पुष्पा दीक्षित- डा. श्रद्धासिंह- डा. कोशलेन्द्रादीनां पत्रवाचनं जातम्। अस्मिन् सत्रे साहित्यस्य नाट्यशास्त्रस्य नवीनप्रवृत्तीनां विषये विचाराः प्रस्तुताः।

द्वितीयदिवसे जातेषु चर्तुषु सत्रेषु प्रो. यदुनाथप्रसाद- प्रो. पुष्पादीक्षित- डा. हर्षदेवमाधव- डा. कृपारामत्रिपाठिवर्याणाम् अधिमञ्चत्वे डा. रमाकान्तपाण्डेय- डा. रविकान्तमणि- डा. शिवकान्तझा- डा. हेमलता- राधावल्लभशर्म- विनोदकुमार तिवारी- डा. जयादिभिः पत्रवाचनं कृतम्। शोधपत्रवाचकैः आधुनिककाव्यकाराणां व्यक्तित्वकृतित्वयोः प्रकाशपातं कृत्वा साहित्यक्षेत्रे तैर्विहितानां नवप्रयोगाणां विषये समालोचना प्रस्तुता।

तृतीयदिवसे पूर्वाह्णे आयोजितसत्रयोः देवर्षिश्रीकलानाथशास्त्रि- प्रो. पुष्पादीक्षितयोः अधिमञ्चत्वे डा. सुदेशकुमार-प्रो. अर्कनाथ चौधरिवर्ययोः सञ्चालकत्वे च प्रो. दीप्तित्रिपाठि-प्रो. जगन्नारायणपाण्डेय- डा. सतीशकपूर- डा. श्रीयांससिंघई- प्रवीणपण्ड्यादीनां शोधपत्रवाचनं जातम्। सत्रस्य निष्कर्षरूपेण अध्यक्षवर्यैः कथितं यत् वर्तमानसंस्कृतसाहित्ये आधुनिकजगतः नवप्रादुर्भूतशब्दानाम् अनुवादस्य समस्याऽस्ति। तत्राऽपि च वैयक्तिकस्तरे क्रियमाणः अनुवादः क्लेशं जनयति। अतः आधुनिकशब्दानां संस्कृते अनुवादं विधातुं मण्डलस्तरे भारतीय-भाषा-विज्ञान-विभागेन प्रयासः विधेयः, येन एतादृशानां शब्दानां प्रमाणिकानुवादः अनूदितशब्दस्य च प्रसारस्य व्यवस्था स्यात्, येन साहित्ये एकरूपता आगच्छेत्।

अपराह्णे जाते अन्तिमसत्रे प्रो. राजेन्द्रनानावटी- प्रो. अभिराजराजेन्द्रमिश्रादीनामधिमञ्चत्वे संगोष्ठ्याः सम्पन्नता जाता। अध्यक्षेण अलङ्कारतत्त्वस्य नूतनैव व्याख्या प्रस्तुता अलम्भावविषयकनवीनसम्भावनानाञ्च प्रतिपादनं कृतम्। सत्रस्यास्य सञ्चालनं डा. रमाकान्तपाण्डेयेन कृतम्। अस्मिन्नवसरे अध्यक्षवर्यः संगोष्ठीसाफल्याय विशेषेण साहाय्यं कृतवद्भ्यः डा. सुरेशसिंहराठौड-कुलदीपशर्म-श्यामसुन्दरादिभ्यः छात्रेभ्यश्च सम्माननं प्रदाय परितोषितवन्तः। परिसरस्य प्राचार्येण डा. हिन्दकेसरिमहाभागेन आगतेभ्यः शोधपत्रवाचकेभ्यः विद्वद्भ्यश्च आभारः व्यक्तीकृतः। विषयस्यास्य विशदतां महत्ताञ्च वीक्ष्य आगामिवर्षे विषयेऽस्मिन् इतोऽपि एका संगोष्ठी भवेदिति आवश्यकता अनुभूता।

❍ **व्याकरणकार्यशाला** (१२.०१.०९ तः १.०२.०९)

"तेजोद्वयस्य युगपद्व्यसनोदयाभ्यामि'ति रीत्या आधुनिकसंस्कृतसाहित्यविषयक-संगोष्ठ्याः सम्पन्नतया सहैव प्रो. पुष्पादीक्षितमहोदयायाः प्रशिक्षकत्वे एकविंशतिदिवसात्मिकायाः व्याकरणविषयिण्याः **अष्टाध्यायीपाठविज्ञानम्** इति शीर्षकान्वितायाः कार्यशालायाः अपि उद्घाटनं जातम्, यस्यां कार्यशालायां व्याकरणाध्ययनस्य पाणिनीयपद्धत्या अध्ययनाध्यापनं सङ्कल्पितम्।

कार्यशालाया उद्घाटनावसरे आध्यक्ष्यमुद्वहता परिसरस्य प्राचार्येण डा. हिन्दकेसरिमहोदयेन साम्प्रतिके काले व्याकरणाध्ययनस्य आवश्यकतां प्रतिपादयता अद्यत्वे तस्योपयोगित्वं प्रत्यपादि। आचार्य-अर्कनाथचौधरि- महोदयस्य संयोजकत्वे प्रवृत्तायामस्यां कार्यशालायां सार्धैकशतं छात्राः प्राध्यापकाश्च प्रतिभागित्वेन भागं गृहीत्वा अष्टाध्यायीपद्धत्या व्याकरणमधीतवन्तः। फरवरीमासस्य प्रथमे दिनाङ्के कार्यशालैषा सम्पन्नतां गता।

❍ **वेदान्तपरिभाषाबोधनवर्गः**

वेदान्तपरिभाषाग्रन्थस्य विशिष्टाध्ययनाय जयपुरपरिसरे १६ फरवरीतः ८ मार्चपर्यन्तं वेदान्तपरिभाषाबोधनवर्गः आयोजितः यत्र वाराणसेयः सुप्रसिद्धः वेदान्तविद्वान् आचार्यः पारसनाथद्विवेदिमहोदयः अध्यापनम् अकरोत्। अस्य अध्ययनसत्रस्य उद्घाटनावसरे बनारस्-हिन्दूविश्वविद्यालयस्य दर्शनविभागस्य आचार्यः सच्चिदानन्दमिश्रः, सागरस्थ-डा.ह.सिं. गौर-विश्वविद्यालयस्य दार्शनिकः आचार्यः अम्बिकादत्तशर्मा च समुपस्थितः आसीत्।

### जयपुरपरिसरे वार्षिकोत्सवः सम्पन्नः

२५.०२.०९ तमे दिनाङ्के पूर्वाह्णे जयपुरपरिसरस्य वार्षिकोत्सवः भव्यतया समायोजितः आसीत्। ज.रा.रा.सं. विश्वविद्यालयस्य आधुनिकसंस्कृतपीठस्य अध्यक्षः देवर्षिकलानाथशास्त्रिमहोदयस्य मुख्यातिथित्वे, कुलपतिमहोदयस्य आचार्य-राधावल्लभ-त्रिपाठिवर्यस्य आध्यक्ष्ये च कार्यक्रमः सम्पन्नः। कार्यक्रमारम्भे परिसरप्राचार्यद्वारा स्वागत-वचनानि प्रस्तुतानि, परिसरस्य वार्षिकप्रतिवेदनं च निवेदितम्। तत्पश्चात् श्रीमता श्यामसुन्दर-शर्मणा भाषणमकारि। देवर्षिकलानाथशास्त्रिवर्यः अभिनन्दनवचनैः छात्रान् प्रोत्साहितवान्। उत्तरोत्तरं छात्राणां प्रगतिनिमित्तं मार्गदर्शनं च अकरोत्। मञ्चस्था अतिथयः वार्षिकस्पर्धासु विजयिभ्यः छात्रेभ्यः पुरस्कारान् प्रदाय अन्वगृह्णन्। कुलपतिमहोदयः परिसरस्य सर्वाङ्गीण-विकासाय शुभकामनां प्रदाय तदर्थं सर्वविधं साहाय्यं यथाशक्ति करिष्यत इति उदघोषयत्। डा. कमलनयनशर्ममहोदयेन कृतेन धन्यवादभाषणेन सभा सम्पन्ना। तदनन्तरं छात्राणां सांस्कृतिककलाप्रतिभा सभ्यैः अक्षिसात् कृता।

### मुम्बई-परिसरे संस्कृत-विज्ञानव्याख्यानमाला

मुम्बय्यां संस्थानपरिसरे क.जे.सोमैय्यासंस्कृतविद्यापीठे वार्षिकोत्सवाङ्गतया जनवरीमासस्य १६,१७ दिनाङ्कयोः विविधाः कार्यक्रमाः आयोजिताः अभवन्। तेषु कार्यक्रमेषु विज्ञानिनाम् आह्वानपुरस्सरं आयोजिता संस्कृतविज्ञानव्याख्यानमाला विशिष्टम् उल्लेखमर्हति। कार्यक्रमे भारतीय-अन्तरिक्ष-अनुसन्धानसंस्थायाः (ISRO) भूतपूर्ववैज्ञानिकः डा. चन्द्रगुप्तवर्णेकरः, नागपुरस्थलक्ष्मीनारायण-अभियान्त्रिक-प्रौद्योगिक-महाविद्यालयस्य आचार्यः पी. होलेमहोदयः, श्री मु.म. टाऊन् पी.जी महाविद्यालयस्य पूर्वतनः प्रवाचकः डा. सुद्युम्नः आचार्यः, पं. गुलामदस्तगीर्महोदयः च संस्कृते विद्यमानानि वैज्ञानिकतथ्यानि विवरीतुं समाहूताः आसन्। ते स्वीयव्याख्यानेषु संस्कृते विज्ञानस्य सत्तां न्यरूपयन्, वैज्ञानिकप्रयोगसिद्धैः उदाहरणैः संस्कृतस्य अद्भुतं वैशिष्ट्यं प्रत्यपादयन्। दिनद्वयात्मककार्यक्रमस्य उद्घाटनसत्रे अध्यक्षभाषणं कुर्वाणः डा. एस्. के. सोमैय्यामहोदयः संस्कृतस्य महत्तां प्रतिपादयन् उक्तवान् यत् विविधान् उपायान् समादृत्य मानवजातेः हिताय संस्कृतकामधेनोः संरक्षणम् अस्माकं नैतिकं कर्तव्यं वर्तते इति।

अपराह्णे परिसरप्राचार्यस्य कमलचन्दयोगिनः अध्यक्षतायां प्रवृत्ते सत्रे विद्वद्भिः वैज्ञानिकैः च संस्कृते विज्ञानम् इति विषये व्याख्यानानि प्रदत्तानि। कार्यक्रमे सोमैय्यासंस्थायाः सदस्यः श्री लीलावेन कोरकः, डा. एस्. राधा, डा. प्रकाशचन्द्रः, डा. सुशान्तराजः, डा. के.के. थाईन्, श्री हरिप्रसादः, डा. गीता दूबे, डा. वत्तीलालमीणा, डा. सञ्जयकुमारसिंहः, डा. समरूपमिश्रः, श्वेतासूद, मधुरानी, पवनकुमारत्रिपाठी, मन्थाश्रीनिवासस, भास्कररेड्डिः छात्राश्च समुपस्थिताः आसन्। परेद्युः पूर्वाह्णे अपि व्याख्यानसत्रमेकं चारुतया सम्पन्नम्।

व्याख्यानमालायाः वार्षिकोत्सवस्य च समापनकार्यक्रमः संस्थानकुलपतेः आचार्यराधावल्लभ- त्रिपाठिवर्यस्य अध्यक्षतायां सम्पन्नः। कुलपतिवर्येण प्रोक्तं यत् संस्कृतम् एका एतादृशी विशिष्टा भाषा अस्ति यत्र विज्ञानं निहितमस्ति। न केवलम् अस्याः भाषायाः वैज्ञानिकता अस्ति अपितु अस्यां भाषायां वैज्ञानिकविचाराणां महान् निधिः वर्तते। संस्कृतस्य एतादृशं वैशिष्ट्यं पाश्चात्यविद्वद्भिः वैज्ञानिकैरपि अङ्गीक्रियते इति। परिसरस्य सर्वतोमुखविकासाय उचितः प्रयासः विधीयते इत्यपि महोदयेन उद्घोषितम्। अवसरेऽस्मिन् समुपस्थितेभ्यः पूजश्री काशिकानन्दस्वामिवर्येभ्यः कुलपतिमहोदयः परिसरप्राचार्यश्च अभिनन्दनपत्रं समर्पितवन्तौ। स्वामिपादैः स्वभाषणे प्रकटीकृतं यत् शास्त्ररक्षणार्थं न्यायव्याकरणयोः अध्ययनं यथा आवश्यकं तथैव समुचितशैल्या जीवितुं वेदानां वेदान्तदर्शनस्य च अध्ययनं प्रवचनं च आवश्यकं वर्तते। अनेन सर्वजीवब्रह्मैक्यभावेन सर्वजीवकल्याणं, सत्येन अहिंसया च विश्वशान्तिः, सार्वजनिकं सुखं च व्यवहारे समानेतुं शक्यते इति। द्विदिवसीय-संस्कृतविज्ञानव्याख्यानमालायाः फलश्रुतिरूपेण क.जे.सोमैया संस्कृतविद्यापीठे संस्कृतविज्ञानप्रयोगशालायाः संग्रहालयस्य च स्थापना कर्तव्या इति सर्वसहमत्या प्रस्तावः मौखिकरूपेण सुनिश्चितः। अस्य कार्यक्रमस्य सञ्चालनं डा. देवदत्तसरोदेमहोदयेन कृतम्।




राष्ट्री-पत्रिकायाः लोकार्पणावसरे वामतः आजादमिश्रः, राजेन्द्रमिश्रः, राधावल्लभत्रिपाठी वादिराजपञ्चमुखी च

## भोपालपरिसरेण आयोजिता प्रबन्धविज्ञानविषयिणी सङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरेण स्थानीय-प्रशासन-अकादम्यां २३-३-०९ तमे दिनाङ्के 'संस्कृतवाङ्मये प्रबन्धविज्ञानम्' इति विषये शैक्षिकी सङ्गोष्ठी समायोजिता। परिसरच्छात्रैः प्रस्तुतेन वैदिक-मङ्गलाचरणेन समारब्धोऽयं कार्यक्रमः। संस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिवर्यस्य अध्यक्षतायां सम्पन्नः। आदौ भोपालपरिसरस्य प्राचार्यः सर्वेभ्यः स्वागतं व्याहरन्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य भूतपूर्वकुलाधिपतिः आचार्यः वादिराजपञ्चमुखी श्रीमद्भगवद्गीतायाः श्लोकोद्धरणपुरस्सरं संस्कृतवाङ्मये विद्यमानान् प्रशासनोपयोगिनः प्रबन्धशास्त्रसम्बन्धिनः विचारान् चारुतया प्रास्तुवत्। सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचरः राजेन्द्रमिश्रमहाभागः समभिप्रेतवान् यत् प्रबन्धविज्ञानक्षेत्रे कार्यं कुर्वद्भिः संस्कृतवाङ्मयान्तर्गताः तत्सम्बन्धिनो विषयाश्च अवलोकनीयाः इति। अध्यक्षपदं विभूषयता कुलपतिवर्येण त्रिपाठिमहोदयेनापि संस्कृतग्रन्थेषु वर्णितविषयाणामवगमनेन प्रबन्धकौशलं वर्धयितुं शक्यते इत्यभिप्रायः प्रकटितः। संस्कृतज्ञैः प्रबन्धशास्त्रविद्भिः च सम्भूय विचिन्त्य अद्यतनसमाजोपयोगिनः एतादृशाः विषयाः प्रकाशनीयाः इत्यपि आशयः कुलपतिमहोदयेन प्रकाशितः। अवसरेऽस्मिन् आजादमिश्रविरचितस्य व्याकणसिद्धान्तरत्नाकरस्य द्वितीभागस्य, राष्ट्री-नामिकायाः परिसरीयवार्षिकपत्रिकायाः च लोकार्पणम् अभूत्।

अपराह्णे समापनसत्रे सागरस्थ-डा. हरिसिंहगौरविश्वविद्यालयस्य हिन्दीविभागस्य आचार्या डा. सत्यवती त्रिपाठी अध्यक्षरूपेणोपस्थाय स्वीयवक्तव्येन सभामन्वगृह्णत्। विशिष्टवक्तृत्वेन समायातौ देवी-अहल्याबाई विश्वविद्यालयस्य प्रबन्धविज्ञानस्य आचार्यः प्रभुनारायणमिश्रः, भोपालस्थ-बरकतउल्ला-विश्वविद्यालयस्य प्रबन्धविज्ञानस्य आचार्यः पी.के.मिश्रः च संस्कृतवाङ्मयस्य प्रबन्धविज्ञानस्य च सम्बन्धं न्यरूपयताम्।




सभां सम्बोधयन्ती सत्यवती त्रिपाठी



संस्कृतवाङ्मये प्रबन्धविज्ञानमिति विषये भाषमाणः वादिराजपञ्चमुखी

## गुरुवायूरुपरिसरे



वामतः के.टी. माधवः, मिथिलाप्रसादत्रिपाठी, वि.एन्.झाः

### ✪ न्यायशास्त्रे आवासीयप्रशिक्षणं प्रवृत्तम्

'नव्यन्यायशास्त्रस्य भाषा एवं प्रक्रिया (प्रविधिः)' इति विषये दशदिनात्मकः आवासीयप्रशिक्षणवर्गः १९-१-०९ तः २८-१-०९ पर्यन्तं गुरुवायूरुपरिसरे प्राचलत्। उज्जयिनीस्थ-कालिदाससंस्कृत-अकादम्याः निदेशकेन आचार्येण मिथिलाप्रसादत्रिपाठिवर्येण कार्यक्रमस्यास्य उद्घाटनं कृतम्। आचार्यः वि.एन्. झा महोदयः आचार्या उज्ज्वला झा च अस्मिन् शिक्षणवर्गे छात्रान् बोधितवन्तौ। प्राचार्यस्य नेतृत्वे डा.पी.जी. श्रीनिवासेन, डा. मधुसूदनेन च संयोजिते एतस्मिन् प्रशिक्षणे कालटिसर्वकलाशालापाण्डिच्चेरिसर्वकलाशाला - शृङ्गेरीपरिसर-लखनऊपरिसर-जगन्नाथविश्वविद्यालयादिभ्यः समायाताः ४७ छात्राः भगमगृह्णन्।

### ✪ विशिष्टव्याख्यानमाला

२०-०१-०९ तः २८-०१-०९ पर्यन्तं गुरुवायूरुपरिसरे आहूतैः विद्वद्भिः विशिष्टव्याख्यानानि कृतानि। २०-०१-०९ दिनाङ्के आचार्यः वि.एन्. झाः न्यायशास्त्रीये विषये, आचार्यः के. महेश्वरन् नायर् 'अद्वैते सत्यम्' इति विषये च व्याख्यानम् अकुरुताम्। २२-०१-०९तमे दिनाङ्के भोपालपरिसरस्य आचार्यः परमेश्वरनारायणशास्त्री शिक्षादर्शनम् इति विषयमधिकृत्य उदबोधयत्। २८-०१-०९ दिनाङ्के शृङ्गेरीपरिसरप्राचार्यः रा. देवनाथः 'श्वो भविता' इति विषयमधिकृत्य प्राबोधयत्।

### ✪ व्याकरणशास्त्रीया विचारगोष्ठी

३०-०१-०९ दिनाङ्के व्याकरणशास्त्रे विचारगोष्ठी सम्पन्ना। श्री शङ्कराचार्यसर्वकलाशालातः आचार्यः गङ्गाधरनायर्, डा. यमुना, डा. एम्.वि. नटेशन्, इत्येते विद्वांसः स्फोटस्य वैज्ञानिकं तत्त्वम्, व्याकरणशास्त्रे केरलीयानां योगदानम्, माहेश्वरसूत्राणां वैज्ञानिकं तत्त्वम् इति विषयेषु प्रबन्धं समर्पयामासुः। कालिकट्विश्वविद्यालयस्य आचार्यः पी नारायणनम्बूदिरिः समासविषये उपन्यस्तवान्।

### ✪ अद्वैतवेदान्तशास्त्रे विचारगोष्ठी

७-२-०९ दिनाङ्के अद्वैतवेदान्तविषयिणी विचारगोष्ठी समायोजिता। तत्र केरलसर्वकारस्य भूतपूर्वमुख्यसचिवः श्रीरामचन्द्रनायर् (भारतीय-प्राशासनिक-सेवा) विचारगोष्ठीम् उदघाटयत्। अपराह्ने 'वेदः वेदान्तश्च' इति विषये डा. राजेष् कुमार पि (सर्वकारीयायुर्वेदकलाशाला, तिरुवनन्तपुरम्), अजिकुमारः पि.वि. (सर्वकारीयसंस्कृतकलाशाला, तिरुवनन्तपुरम्), स्वामी संवित्-चैतन्यः (चिन्मयमिषन्, कोयम्बत्तूर्) डा. श्रीनिवासन् पि.वि. (सर्वकारीयसंस्कृतकलाशाला, तृपूणित्तुरा) इत्येते उपर्युक्तविषयमधिकृत्य शोधपत्राणि प्रास्तुवन्।

### जम्मूपरिसरे वार्षिकोत्सवः

रा.सं.संस्थानस्य जम्मूस्थ-रणवीरपरिसरे १३.२.२००९ दिनाङ्के शुक्रवासरे अपराह्णे वार्षिकोत्सवः परिपालितः। कार्यक्रमे विशिष्टातिथिरूपेण डा. मीनाक्षीकिलमहोदयः समुपस्थाय छात्रान् अन्वगृह्णत्। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः अध्यक्षस्थानमलङ्कृत्य सभां सम्बोध्य संस्कृतोज्जीवनाय अस्माभिः सम्भूय प्रयतनीयम् इति अभिप्रायं प्राकटयत्। परिसरप्राचार्यः डा. विश्वमूर्तिशास्त्रिमहोदयः परिसरपक्षतः अतिथिवरेण्यान् सत्कृतवान्।




पुर्यां सदाशिवपरिसरस्य वार्षिकोत्सवे (वामतः) शुक्लामुखर्जी, राजेन्द्रमिश्रः, अशोककालिया, राधावल्लभत्रिपाठी, कनियालः, जि.गङ्गान्ना

### पूर्णप्रज्ञसंशोधनमन्दिरे राष्ट्रियगोष्ठी

राष्ट्रियसंस्कृतसंस्थानकुलपतिना आचार्यराधावल्लभत्रिपाठिवर्येण विरचितस्य अभिनवकाव्यालङ्कारसूत्रम् अधिकृत्य बेङ्गलूरुनगरे पूर्णप्रज्ञसंशोधनमन्दिरे दिनद्वयात्मिका विचारगोष्ठी प्रवृत्ता। परमपूज्य श्रीश्री विश्वेशतीर्थस्वामिपादानां आध्यक्ष्ये प्रवृत्तस्य कार्यक्रमस्य उद्घाटनावसरे डा. डि. प्रह्लादाचार्यः सर्वेभ्यः स्वागतं व्याहृत्य प्रास्ताविकं भाषणमकरोत्। कार्यक्रमे समुपस्थितः संस्थानकुलपतिः संशोधनमन्दिरस्य विश्वव्यापिजालपुटस्य (website) उद्घाटनमकरोत्। आचार्यः राजेन्द्रमिश्रमहोदयः (सम्पूर्णानन्द सं.वि.वि. कुलपतिचरः) गोष्ठ्यां चर्च्यविषयस्य उपोद्घातरूपं भाषणं कृत्वा चिन्तनम् अभिप्रेरितवान्। संशोधनमन्दिरस्य निदेशकः डा. ए.वि. नागसम्पिगेमहोदयः उपस्थितेभ्यः कृतज्ञतां व्यज्ञापयत्। डा. सत्यनारायणाचार्येण संयोजितस्य एतस्य उद्घाटनसत्रस्यानन्तरम् अपराह्णे काव्यलक्षण-प्रयोजन-कारणनिरूपणम्, काव्यभेदनिरूपणं शब्दव्यापारनिरूपणं, शास्त्रासङ्गतिनिरूपणम्, अलङ्कारस्वरूपनिरूपणम्, आभ्यन्तरालङ्कारनिरूपणम्, बाह्यालङ्कारनिरूपणम्, काव्यविशेषविमर्शः इत्यादिविषयेषु विचारान् उपस्थापयितुं डा. एम् शिवकुमारस्वामी (बेङ्गलूरु), प्रा. शेषाचलशर्मा (बेङ्गलूरु), डा. एच्.पी. देवकी (मैसूरु), प्रा. हेच्. वि. नागराजराव् (मैसूरु), प्रा. मुरलिमाधवन् (कालडी), प्रा. रामसूर्यनारायणः (तिरुपति), प्रा. देवीप्रसादः (चेन्नै), डा. विरूपाक्षजड्डीपालः (तिरुपति), डा. आर् गणेशः (बेङ्गलूरु) इत्यादयः विद्वांसः समाहूताः आसन्। विद्वान् सञ्जीवाचार्यः, डा. शङ्करनारायण-अडिगः, डा. माधवपाण्डुरङ्गी च गोष्ठ्याः विविधाधिवेशनानि संयोजितवन्तः।

## शृङ्गेरीपरिसरे

### ❖ वार्तादर्शिन्याः उद्घाटनम्

जनवरीमासस्य नवमे दिनाङ्के रा.सं.संस्थानस्य प्र. कुलसचिवेन श्रीमता चन्दनसिंह कनियालेन परिसरे वार्तादर्शिनी-फलकं समुद्घाटितम्। एतद्धि फलकं विशिष्टानाम्, अवश्यं ज्ञेयानां वृत्तपत्रादिषु प्रकाशितानां ज्ञानवर्धकवार्ताकणिकानां सङ्कलनं विधाय प्रदर्शनाय कल्पितमस्ति।

### ❖ वाक्यार्थपरिषदः उद्यापनम्

परिसरीयवाक्यार्थपरिषदः ऐषमः शैक्षिकसत्रस्य अन्तिमम् अधिवेशनं २७-१-०९ दिनाङ्के सम्पन्नम्। विख्यातः वैयाकरणः विद्वान् एस्.टी. नागराजः (बेङ्गलूरुस्थ-चामराजेन्द्रसंस्कृतमहाविद्यालये आचार्यः) कार्यक्रमे मुख्यातिथित्वेन' समुपस्थितः आसीत्। परिसरप्राचार्यस्य रामानुजदेवनाथस्य अध्यक्षतायां प्रवृत्ते एतस्मिन् अधिवेशने डा. गणेश ईश्वरभट्टः 'एकविज्ञानेन सर्वविज्ञानम्' इति विषये, श्री के. पद्मनाभः 'कर्मकर्तरिप्रक्रिया' इति विषये च व्याख्यानम् अकुरुताम्। आचार्यः नागराजवर्यः स्वीये वक्तव्ये शास्त्र-शास्त्रान्तराणां पारस्परिकं सम्बन्धं सम्यङ्निरूप्य ज्ञेयान् बहून् विचारान् उदबोधयत्। कार्यक्रमप्रारम्भे आचार्येण सच्चिदानन्देन नागराजवर्यस्य वैदुष्यं परिचायितमासीत्। वाक्यार्थपरिषदः संयोजकाभ्यां डा. भगवान् सामन्तराय-चन्द्रशेखरभट्टाभ्यां कार्यक्रमः संयोजितः।




वाग्वर्धिनीमहोत्सवम् उद्घाटयन् गौरीशङ्करः, रा.देवनाथः, सच्चिदानन्द-उडुपः च

### ❖ वाग्वर्धिनी-महोत्सवः

परिसरे त्रिदिवस-वाग्वर्धिनीमहोत्सवः २९ जनवरीतः ३१ पर्यन्तं प्राचलत्। तत्रादौ २९ दिनाङ्के उद्घाटनावसरे समुपस्थितः शृङ्गेरीश्रीमठस्य प्राशासनिकः पद्मश्री गौरीशङ्करः परिसरीय-वाग्वर्धिनीपरिषत् छात्राणां व्यक्तित्वस्य प्रतिभायाश्च विकासिका वर्तत इति अभिप्रेतवान्। स्वीयाध्यक्ष्य-भाषणे परिसरप्राचार्यः देवनाथमहोदयः गौरीशङ्करमहोदयेन परिसरसंवर्धनाय प्रदत्तान् विविधान् सहकारान् कृतज्ञतापूर्वकम् अस्मरत्।

वाग्वर्धिनीमहोत्सवाङ्गतया आयोजितेषु कार्यक्रमेषु २९-१-०९ दिनाङ्के अपराह्णे प्रवृत्तं गीतावधानम् अष्टावधानं च विशिष्टम् उल्लेखमर्हति। गीतावधानं तिरुपतितः समागतेन श्रीमता ए. सच्चिदानन्दमूर्तिना प्रदर्शितमासीत्। अनेन मेधाविना समग्रभगवद्गीतायाः विषये समधिगतम् अवधानकौशलं प्रकाशयितुं विविधरीत्या प्रश्नान् कर्तुम् अष्टौ विद्वांसः प्राश्निकरूपेण उपस्थिता आसन्। अष्टावधानं प्रदर्शितमासीत् श्रीमता वेङ्कटरमणभट्टेन। सायं ५वादनतः ८.३० वादनं यावत् घण्टात्रयम् अष्टौ प्राश्निकाः अवधानिनः सामर्थ्यं प्रकाशितवन्तः। एतत् द्विविधम् अवधानं वीक्ष्य छात्राः अत्यन्तं प्रभाविता अभवन्। ३० तमे दिनाङ्के आचार्यस्य सच्चिदानन्द उडुपमहोदयस्य अध्यक्षतायां द्वादश छात्राः विविधविषयेषु वाक्यार्थविचारान् प्रास्तुवन्। अपराह्णे अन्त्याक्षरीस्पर्धा सांस्कृतिककार्यक्रमाश्च आयोजिताः आसन्।

महोत्सवस्य तृतीये दिने अर्थात् ३१ तमे दिनाङ्के प्रवृत्ते समापनकार्यक्रमे मैसूरुनगरस्थ-कर्णाटकराज्य- मुक्तविश्वविद्यालयस्य आचार्यः राधाकृष्णभट्टः मुख्यातिथित्वेन समागत्य छात्रान् उद्बोधितवान्। परिसरप्राचार्यः देवनाथमहोदयः वाग्वर्धिनीसभासु गृहीतभागैः छात्रैः साधितं क्रमिकविकासम् श्लाघितवान्। सायं कृष्णार्जुनीयनामकयक्षगानप्रसङ्गेन कार्यक्रमः सम्पन्नतां गतः।

### ❖ नैतिकसमाजनिर्माणाय छात्राणं घोषणा

कर्णाटकराज्यसर्वकारेण आतङ्कवादं विरुध्य क्रियमाणे जनजागरणाभियाने परिसरच्छात्राः भागमगृह्णन्। ६-२-०९ दिनाङ्के छात्राः शृङ्गेर्याः वीथीषु घोषयात्रायां उग्रवादं, दुराचारं च विरुध्य घोषणां कृत्वा स्वस्थ-सुन्दर-सात्विक-समाजनिर्माणस्य आवश्यकतां प्रत्यपादयन्।

### ❖ विद्वत्समागमः

ऋषिकेशस्थ-श्रीशिवानन्दस्वामिपादस्य शिष्यवरेण्ययोः श्रीशिवस्वरूपानन्द-जिज्ञासानन्दस्वामिपादयोः दिव्योपस्थितौ १२-२-०९ दिनाङ्के विद्वत्समागमकार्यक्रमः प्रवृत्तः। छात्रेभ्यः आशिषः प्रयच्छद्भ्यां स्वामिपादाभ्यां प्रतिपादितं यत् जीवनसाफल्याय स्पष्टं लक्ष्यं, उत्तमं चिन्तनं, प्रामाणिकः प्रयत्नः च छात्राणां भवेत् इति।

### ❖ पू.शि.शा.प. प्रशिक्षणम्

पूर्वशिक्षाशास्त्रिपरीक्षायाः निमित्तं छात्रेषु अपेक्षितं ज्ञानं कौशलं च वर्धयितुं परिसरेण शिक्षणकक्षाः आरब्धाः। परिसरप्राचार्यस्य आध्यक्ष्ये प्रवृत्ते अस्य कार्यक्रमस्य उद्घाटनसत्रे तिरुपतिस्थ-रा.सं. विश्वविद्यालयस्य शिक्षाशास्त्रसङ्कायप्रमुखः आचार्यः रविशङ्करमेनोन् महोदयः उद्घाटकत्वेन समाहूत आसीत्। विदुषा मेनोन्वर्येण अभिप्रेतं यत् ईदृशकार्यक्रमाः शिक्षाशास्त्रिकक्षासु प्रविविक्षूणां गुणवत्तासंवर्धनदृष्ट्या महत्त्वं भजन्ते इति। डा. सोमनाथसाहू अस्य प्रशिक्षणस्य उद्देश्यविवरणपुरस्सरं प्रास्ताविकभाषणम् अकरोत्। आचार्यः ए.पि. सच्चिदानन्दः स्वागतं व्याहरत्। डा. रामचन्द्रुल बालाजीमहोदयः उद्घाटनसत्रं संयोजितवान्।

# वृत्तपत्रदर्पणे संस्थानम्

जन समाचार, मुम्बई
१ फरवरी, २००९



## संस्कृत भाषा के बिना विज्ञान समझना कठिन

मुंबई: हाल ही में केजी सोमैया संस्कृत विद्यापीठ, विद्याविहार में दो दिवसीय संस्कृत विज्ञान व्याख्यान माला का आयेजन किया गया। इस अवसर पर राष्ट्रीय संस्कृत संस्थान (मा.वि.) के कुलपति प्रोफेसर राधावल्लभ त्रिपाठी ने कहा, "संस्कृत भाषा ज्ञान का भंडार है। इसमें काव्य, साहित्य, विज्ञान सबकुछ निहित है। संस्कृत भाषा विज्ञान को जाने बगैर भाषाओं का विकास नहीं हो सकता।"

उन्होंने ज़ोर देते हुए कहा, "संस्कृत भाषा की रक्षा करते हुए आधुनिक विचारधारा का समन्वय करना ज़रूरी है।" व्याख्यान माला की अध्यक्षता करते हुए सोमैया ट्रस्ट के उपाध्यक्ष डा. एसके सोमैया ने कहा कि अंग्रेज़ी भाषा के बढ़ते प्रभाव के आगे सभी भाषाएं दबती जा रही हैं। मगर संस्कृत के रक्षण के लिए सोमैया ट्रस्ट कटिबद्ध है और भविष्य में संस्कृत जाननेवालों को ट्रस्ट वरीयता देगी।

डा. सुधुम्नाचार्य, प्रो. प्रशांत होले, डा चंद्रगुप्त वर्णेकर तथा प. गुलाम दस्तगीर ने भी इस अवसर पर अपने विचार व्यक्त करते हुए संस्कृत की महत्ता पर प्रकाश डाला। इस अवसर पर प्राचार्य डा. कमलचंद्र योगी ने कहा कि संस्कृत ही ऐसी भाषा है जिसमें कंप्युटर साफ़्टवेयर में प्रोग्राम करना सबसे सरल है। वह दिन दूर नहीं जब संस्कृत रोज़गार की भाषा बन जायेगी।

## Date with Sanskrit drama

HT Correspondent,
Bhopal, March 20

THE THREE-DAY All-India Sanskrit Drama Festival, organised by the Rashtriya Sanskrit Sansthan, began at Bharat Bhavan on Friday. The inaugural programme started at 10:30 a.m.

The invited guests received a warm floral welcome, after which Prof. Radha Vallabh Tripathi, Vice-Chancellor of Rashtriya Sanskrit Sansthan, New Delhi, gave the welcome speech. He explained the importance of Sanskrit drama in keeping alive the cultural ethos of the country.

Dr Kamlesh Dutt Tripathi presented his experimental notes on Sanskrit drama. Noted theatre artiste Habib Tanvir spoke on the attraction for the dramatic art in various classes of the society.

Dr KS Rajendran presented a thesis on various possibilities of poetic drama. Concluding this segment, Kavalam Panikkar shared his experiences on staging a Sanskrit drama. The afternoon session started at 3 p.m with the chanting of the *Samveda* and recital of *Dhruvagayan*.

In the evening, *Abhigyanshakuntalam*, of Kalidasa and directed by K Panikkar was staged at Antarang. Divided into seven acts, the play revolved around two central characters: Shakuntala and Dushyant. The other supporting characters were Priyamvada, Vishwamitra, Bharat and Kan Variti. All the characters seemed to do the justice to the ancient and classical creation. The inclusion of light humor in between the acts was enough to hold the audience. Though the whole play was in pure Sanskrit, it was able to captivate the gathering.



PRAVEEN BAJPAI/HT

A scene from the Sanskrit play 'Abhigyanshakuntalam' staged at Bharat Bhavan in the City on Friday.

विविध

समय जगत, भोपाल
सोमवार, २३ मार्च २००९



भोपाल। कलाधानी के नाम से विख्यात भोपाल के बहु कला केन्द्र भारत भवन में तीन दिवसीय राष्ट्रीय संस्कृत नाट्योत्सव के तहत शुक्रवार की एक शाम अभिज्ञानशाकुन्तलम् तथा शनिवार की एक शाम कुंदमाला के प्रभावी मंचन के रूप में हुई। ग्वालियर नाट्य संस्था के तत्वावधान में मंचित कुंदमाला में रामायण के एक प्रसंग के तहत सीता के वन गमन और वाल्मीकि आश्रम में लवकुश के जन्म और उनके बड़े होने की घटना का प्रभावी मंचन हुआ। नाटक की विशेषता यह थी कि अनेक दृश्यों के बावजूद भी दर्शकों में कभी भी बोझिलता नहीं आई। वहीं रूपाभ संस्था की ओर से कला[illegible] भी प्रदर्शित किया गया। जिसमें रंजीत सिंह शिंदे, वंदना[illegible] मनीषा सलूजा, अनुराग जड़िया, तृप्ती गुप्ता, मनीष चंदेरिया[illegible] में विभिन्न भावों को बेहतर ढंग से प्रदर्शित किया।

५ दिसम्बर २००८

भारती संस्कृत-मासपत्रिका

### राष्ट्रियसंस्कृतसंस्थानस्य वार्तापत्रम्

दिल्लीराजधान्यां मुख्यालयं धारयत्, देशे च नवपरिसरान् सञ्चालयत् राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयत्वेन सम्मानितं संस्कृतशिक्षायाः, संस्कृतोत्थानप्रयासानां च केन्द्रमस्ति। इदं हि राष्ट्रपतिसम्मानितानां विदुषां सम्मानस्य दायित्वमपि वहति, समस्तेऽपि देशे संस्कृतसंवर्धनात्मकानां [illegible] वीक्षणं, तदर्थं वित्तीयानुदानादिव्यवस्थाकार्यमपि निर्वाहयति, संस्कृते विशिष्टः सम्भारोऽपि [illegible] संस्थानस्य प्रकाशनानीति देशे सुविदितमस्य महत्त्वम्। अस्य शोधपत्रिका "विमर्शः" इत्याख्या [illegible], या गतेषु दिवसेषु नाऽभूत् प्रकाशिता, सा सम्प्रति नूतनेनोत्साहेन प्रकाशयिष्यते, संस्थानस्य परिसरेभ्यश्च प्रवर्तमानानां संस्कृत संवर्धन–प्रकाशन–सम्मेलन–संगोष्ठ्यादीनां गतिविधीनां सूचनाः प्रसारयितुमेकं वार्तापत्रमपि "संस्कृतवार्ता" नाम्ना (त्रैमासिकरूपेण) प्रकाशयितुमारब्धमिति सुमहान् हर्षः।

[illegible] कुलपतिपदमधितिष्ठद्भिः प्रो. राधावल्लभत्रिपाठिभिरेतदीयाः उपक्रमाः सोत्साहं प्रवर्तिता इति सम्भावयामस्तावत्।

वार्तापत्रमिदं मसृणेषु पत्रेषु सचित्रं, विविधरङ्गरञ्जितं, विविधसूचनासहकृतं च प्रकाशितमिति नूनं सर्वान् परिसरस्थानपि प्रोत्साहयेत्, संस्कृतजगदध्यक्षाणां [illegible] आह्वानः। जुलाई सितंबर 2008 [illegible]।

All India Sanskrit Drama Festival

## Kundmala staged on Day-2



# छात्रप्रातिभम्

## शृङ्गेरीपरिसरच्छात्रः वित्तकोषे उद्योगं प्राप्नोत्

शृङ्गेरीपरिसरस्य अद्वैतवेदान्ताचार्य-द्वितीयवर्षस्य श्री राममूर्तिः कर्णाटकबैङ्क् इति वित्तकोषस्य लिखितपरीक्षायां साक्षात्कारे च उत्तीर्णः सन् वित्तकोषस्य मुम्बईशाखायां नियुक्तोऽभवत्।

## रामायण-महाभारत-परीक्षयोः अस्मच्छात्राभ्यां प्रथमस्थानमधिगतम्

बेङ्गलूरुनगरस्थया 'भारतसंस्कृतिप्रतिष्ठानम्' इति संस्थया आयोजितायां रामायणपरीक्षायां शृङ्गेरीपरिसरस्य रूपश्रीहेगडे (प्रा.शा.प्र.व.), महाभारतपरीक्षायां श्री मनोजहेब्बारः (प्रा.शा.द्वि.व.) च प्रथमस्थानं प्राप्तवन्तौ।

## राज्यस्तरीयस्पर्धायां विजयः

कर्णाटकराज्ये आदिचुञ्चनगिरिः इत्यत्र श्री कालभैरवेश्वर-संस्कृत-वेदागममहाविद्यालयेन जनवरी ९, १० दिनाङ्कयोः आयोजितायां राज्यस्तरीय-शैक्षिकस्पर्धासु शृङ्गेरीपरिसरच्छात्राः पञ्च पुरस्कारान् प्राप्य विजयवैजयन्तीभाजः अभूवन्। पुरस्कारभाजः इमे – शास्त्रितृतीयवर्षस्य कुमारी अर्चना (निबन्धलेखने प्र.पु.), आचार्यप्रथमवर्षस्य कुमारी शिल्पा सी.जी (निबन्धलेखने द्वि.पु.), शास्त्रिप्रथमवर्षस्य श्री इन्दुशेखरः (अन्त्याक्षर्यां तृ.पु.), शास्त्रिप्रथमवर्षस्य कुमारी भारती एस्. (अन्त्याक्षर्यां सा. पु.), आचार्यप्रथमवर्षस्य श्रीरामकृष्णः (भाषणे सा. पु.)।

## शृङ्गेरीपरिसरं वृतवती विजयवैजयन्ती

तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालयेन आयोजिते राष्ट्रस्तरीये अन्तर्विश्वविद्यालय-संस्कृत-युवप्रतिभोत्सवे विविधस्पर्धासु शृङ्गेरीपरिसरस्य इमे छात्राः विजयिनो भूत्वा प्रतिभावैजयन्तीम् आपुः–विनायकरजतः (ज्यौतिषे, प्रश्नमञ्चे च प्र.पु), यदुवीरस्वरूपः (प्रश्नमञ्चे प्र.पु., व्याकरणभाषणे द्वि.पु.), रामकृष्णः (साङ्ख्ययोगे प्र.पु.) विनायक जि. भट्टः (मीमांसाभाषणे तृ.पु., धर्मशास्त्रे सा.पु.), विनायक एस्.भट्टः (सङ्गीते प्र.पु.), गानमूर्तिः (न. न्याये द्वि. पु.) अश्विनीहेगडे (नृत्ये द्वि.पु.), रवीशहेगडे (एकपात्राभिनये द्वि.पु.) विनायक एस्.भट्ट-वि.रजत-अश्विनी-रवीश सौम्या-विघ्नेश्वर-सब्रह्मण्यभट्ट-लक्ष्मीनारायण जेना-प्रभृतिभिः समन्वितं नाटकदलं (प्र.पु.)।

## आसन्नाः वार्षिकपरीक्षाः

- पूर्वमध्यमा, पाक्शास्त्रि-उत्तरमध्यमा-प्रथमवर्षस्य छात्राणां कृते विद्यालयस्तरीयाः वार्षिकपरीक्षाः २४.३.०९ तः ६.४.०९ पर्यन्तं भविष्यन्ति।
- प्रथमा/तृतीया-प्राक्शास्त्रि-उत्तरमध्यमा-द्वितीयवर्षच्छात्राणां कृते विद्यालयस्तरीया वार्षिकपरीक्षाः १५.४.०९ तः २९.४.०९ पर्यन्तं भवेयुः।
- शास्त्री, आचार्य, शिक्षाशास्त्री एवं शिक्षाचार्यः इत्येतासां वार्षिकपरीक्षाः १५.४.०९ तः ०१.०५.०९ पर्यन्तं भवितारः।

**परीक्षार्थिभिः इदमवधेयं यत् लोकसभानिर्वाचनकारणतः पूर्वं सर्वत्र प्रेषितायां परीक्षासमयसारिण्याम् ईषत् परिवर्तनं ( १६.४.०९ एवं २३.४.०९ दिनाङ्कयोः स्थाने २९.४.०९ एवं ०१.०५.०९ इत्येवं परिवर्तनं ) सञ्जातम् इति परीक्षाविभागेन प्रकटिता सूचना निगदति। परिवर्तिता नूतना समयसारिणी इह अवलोक्यताम्–**

पूर्वाह्णे नववादनतः - द्वादशवादनपर्यन्तम्    अपराह्णे द्विवादनतः - पंचवादनपर्यन्तम्    प्रथमं, द्वितीयम्-इत्यादिना पत्रसंख्या ज्ञेया।

| तिथिः | समयः | शास्त्री I | शास्त्री II | शास्त्री III | आचार्य I | आचार्य II | शिक्षा-शास्त्री | शिक्षाचार्य |
|---|---|---|---|---|---|---|---|---|
| १५.४.०९ | प्रातः | – | प्रथमम् | – | – | प्रथमम् | – | प्रथमम् |
| | अपराह्ने | – | – | प्रथमम् | – | – | प्रथमम् | – |
| १७.४.०९ | प्रातः | – | द्वितीयम् | – | – | द्वितीयम् | – | द्वितीयम् |
| | अपराह्ने | – | – | द्वितीयम् | – | – | द्वितीयम् | – |
| १८.४.०९ | प्रातः | द्वितीयम् | – | – | द्वितीयम् | – | – | – |
| | अपराह्ने | – | – | – | – | – | – | – |
| २०.४.०९ | प्रातः | – | तृतीयम् | – | – | तृतीयम् | – | तृतीयम् |
| | अपराह्ने | – | – | तृतीयम् | – | – | तृतीयम् | – |
| २१.४.०९ | प्रातः | तृतीयम् | – | – | तृतीयम् | – | – | – |
| | अपराह्ने | – | – | – | – | – | – | – |
| २२.४.०९ | प्रातः | – | चतुर्थम् | – | – | चतुर्थम् | – | चतुर्थम् |
| | अपराह्ने | – | – | चतुर्थम् | – | – | चतुर्थम् | – |
| २४.४.०९ | प्रातः | – | पंचमम् | – | – | पंचमम् | – | पंचमम् |
| | अपराह्ने | – | – | पंचमम् | – | – | पंचमम् | – |
| २५.४.०९ | प्रातः | पंचमम् | – | – | पंचमम् | – | – | – |
| | अपराह्ने | – | – | – | – | – | – | – |
| २७.४.०९ | प्रातः | – | षष्ठम् | – | – | – | – | षष्ठम् |
| | अपराह्ने | – | – | षष्ठम् | – | – | षष्ठम् | – |
| २८.४.०९ | प्रातः | षष्ठम् | – | – | – | – | – | – |
| | अपराह्ने | – | पर्यावरणम् | – | – | – | – | – |
| २९.४.०९ | प्रातः | प्रथमम् | – | – | प्रथमम् | – | – | – |
| | अपराह्ने | – | – | – | – | – | – | – |
| ०१.५.०९ | प्रातः | चतुर्थम् | – | – | चतुर्थम् | – | – | – |
| | अपराह्ने | – | – | – | – | – | – | – |

# पुरीपरिसरे यूनां जयत्युत्सवः

अभिराजराजेन्द्रमिश्रः

वात्सल्यं विदुषां मुदा विशदयन् संवित्तृषां वर्धयन्
छात्राणाञ्च मिथोऽनुरागरचनामाकल्प्य सम्भावयन्।
दिव्यां संस्कृतदेशतां सफलयन् वागीश्वरीं कीर्तयन्
सौहार्दं जनयन् पुरीपरिसरे यूनां जयत्युत्सवः॥१॥

दारुब्रह्म विराजते स भगवान् नीलाचलेशो जग-
न्नाथो यत्र सुभद्रया हलभृता सार्धं यशोदात्मजः।
तत्र ज्ञानविभाविभासिततनुः संस्थानजीवातुभृत्
तिष्ठत्यूर्ध्वगवाक्षभूरिनयनोऽयं विश्वविद्यालयः॥२॥

आनन्दैः कुतुकैश्च पूर्तिमभजत् तत्रैषमः संस्कृत-
च्छात्राणां युवकोत्सवः कुलपतेः श्रीगर्भसंरक्षणे।
राधावल्लभपाणिपल्लवतले यत्रोत्कला भारती[1]
क्रीडन्ती क्रतुमाहरत्सुमनसां श्रीसन्निधौ चाक्षुषम्॥३॥

शृङ्गेरी-गरली-पुरी-लखनऊ-भोपाल-मुम्बापुरी-
गुर्वायूर-प्रयाग-जम्मु-जयपूः केन्द्रात्सहस्राधिकाः।
सम्प्राप्ता बटवो दिनत्रयमहो वाक्संस्कृताराधकाः
श्रीमन्नीलगिरीन्द्रपादनुतयेऽयच्छन् प्रणामाञ्जलिम्॥४॥

व्याख्यानैर्नवगीतिकैश्च ललितैः शास्त्रीयरागात्मकै-
र्नृत्यैश्चापि सदाशिवः परिसरो जातः प्रहर्षोन्मदः।
क्रीडाभिश्च शरीरलाघवकलायुक्ताभिराह्लादनं
श्रोतृभ्योऽथ च दर्शकेभ्य उभयं विद्यार्थिनस्सन्ददुः॥५॥

कथं रात्रिर्व्यतीयाय कथं यातं दिनत्रयम्?
वेद कोऽपि सयत्नोऽपि नोऽस्मिन् युवमहोत्सवे॥६॥

प्रीतिरज्जुनिबद्धस्य काङ्क्षया दर्शनार्थिनाम्।
श्रीजगन्नाथदेवस्याऽप्यहो स्वापस्सुदर्लभः॥७॥

कर्णाटा ननु केरलाश्च तमिला आन्ध्रामहाराष्ट्रका
वङ्गाङ्गोत्कलललाटजा गिरिभुवो मध्योत्तराः कोसलाः[2]।
प्रत्येकं करणाङ्गहाररचनाकेलीभिरात्माश्रयां
वाक्कायप्रतिभां प्रदर्श्य विदुषां जह्रुर्मनांसि ध्रुवम्॥८॥

यन्न कर्तुं समर्थाऽभवज्जातुचि-
द्राजनीतिः प्रयत्नैरनन्तैरहो।
संस्कृतेनैकमात्रेण चक्रेऽखिलं
तन्नु सांस्थानिको विश्वविद्यालयः॥९॥

भारतं संस्कृतेनैव तुल्यस्वरं
भारतं संस्कृतेनैव तुल्योद्यमम्।
तुल्यलक्ष्यञ्च तुल्यानुभावं महत्
संस्कृतेनैव तद्भारतं भा-रतम्॥१०॥

प्रसारयन् छात्रगणेषु सौहृदं
प्रवर्धयंश्चापि मनोज्ञबान्धवम्।
जयेच्चिरं नव्यजनिर्महोत्सव-
स्स राधिकावल्लभसन्मनोरथः॥११॥

पार्थिवस्सागरो नीलः स्वावधौ, स्वावधौ पुनः।
सारस्वतस्सिताम्भोधिः स्वैरमुच्छलतां गतौ॥१२॥

विलोक्य पञ्चकल्याणीं सीताच्छायञ्च रूपकम्।
केऽभवन्न महाश्चर्यचूडामणिविनोदिताः[3]॥१३॥

दर्शनेनाऽशुभघ्नेन जगन्नाथकुटुम्बिनाम्।
प्रकाशितो न कस्यात्मा, जन्म जातं न सार्थकम्॥१४॥

सुरगवीपरिशीलसत्फलो
निखिलराष्ट्रहृदुद्यमयोजकः।
युववटूच्चय-देशिकसङ्गतो
विजयतामिह पूर्णमहोत्सवः॥१५॥

त्रिवेणीकविराजेन्द्रैरक्षिलक्ष्यीकृतोत्सवम्।
वाच्यचित्रार्पितं दृष्ट्वा परितुष्यन्तु पण्डिताः॥१६॥

इति श्रीमदभिराजराजेन्द्रप्रणीतं पुरीयुवमहोत्सववर्णनम्॥

---

१. उद्गताः कलाः यस्याः सा भारती यद्वा उत्कलीया भारती।
२. मध्यकोसला मध्यप्रदेशीयाः, उत्तरकोसलाश्चोत्तरप्रदेशीयाः।
३. मुद्रालङ्कारेण नाट्यप्रस्तुतिस्मरणम्।







Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.I No.3 Pub. by the Registrar for Rashtriya Sanrkrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007